
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ अथ स्मृत्यर्थसारे आन्हिक प्रारंभः ॥

Acc. No. ~~6099~~ m1634

Title - स्मृत्यर्थसार

Author - श्रीधराचार्य, महामाहेश्वर,
नागविष्णुभट्टोपाध्याय, विश्वामित्रगोत्र

Date - ?

Sub - धर्मशास्त्र

folio - 75.

Xerox - 149.

चार्यै

॥ ॥ॐ सिद्धिः श्रीगणेशाय नमः॥ ॥गणेशब्रह्मविष्णीशान्वाग्भोमालोकपान्गुरून्नारदगर्गमन्वादिकांश्च देव्याख्या

नृसिंहश्च महागुरून्॥ श्रीकंठश्रीकराचार्यैः श्रुतिस्मृतिपुराणगैः। स्मृतिशास्त्रेष्वनेकेषु विप्रकीर्णेष्वनेकधा॥ श्र

त्वाद्यनुपकारार्थं स्मार्तसिद्धिं प्रयत्नतः॥ पुराणन्यायमीमांसासांगवेदैः समुद्धृतं॥ कामधेनोः प्रदीपश्चोक्तं कल्पवृ

क्षलतादिषु॥ शंभुद्रविडकेदारलोलटाद्यैश्च ताषितं॥ मन्वाद्यनेकस्मृतिषु व्याख्यातं प्रतिपादितं॥ स्मृत्यर्थ

सारं वक्ष्यामि शुभ्रस्वानुष्ठानसिद्धये॥ प्राचीदिशामनुक्तौ स्यादुदीचीशानदिक्तथा॥ तिष्ठत्यपक्षता तुक्ता वासीन

त्वं च कर्मसु॥ कर्तृणामनुक्तौ तु दक्षिणांगं लवेन तथा॥ कुत्सिते वामहस्तः स्याद्दक्षिणः स्यादकुत्सिते॥ यज्ञोप

वीतिना कार्यं सर्वं कर्मप्रदक्षिणं॥ मनःप्रसादास्तत्पोत्क्षान्तपसास्नानेन कर्मणा॥ आचान्तपाचात्मनः शुद्धि

स्तत्पाक कर्मसमाचरेत्॥ कर्मणीयथा क्रांतं ज्ञात्वा तावदेव तु न स्मरेत्॥ प्रधानस्याक्रियायां तु सांगं तत्क्रियते

पुनः॥ तदंगाकारणे कुर्यात्प्रायश्चित्तं न कर्म तत्॥ प्रभुः प्रथमकल्पस्य योनुकल्पेनुवर्तते॥ स नाप्नोति फ

लं तस्य परत्रेति श्रुतिस्मृती॥ कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्॥ अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्य

१

चरेन्नृत्वा वक्कल्पं वा स्वयं प्रयोक्तं यस्य कार्मं प्रचोदितं। तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत्। श्रौतेष्वप्र
यशाखोक्तं सर्वस्यैव यथोदितं। स्मार्त्तं साधारणं तेषु गार्ह्यं श्रौतेषु कर्मसु। समयाचारिका धर्मा ज्ञा निर्दे
श कुलोद्भवाः। ग्रामाचाराः परिज्ञात्याः थैव विप्यनिरोधिनः। युगधर्माः परिज्ञात्याः सर्वत्रैव यथोदितं। य
त्कृते दश वर्षैस्त्रेतायां हायनेन तत्। द्वापरे तच्च मासेन अहोरात्रेण तत्कलौ। देवरेण सुतोत्पत्तिर्वानप्रस्थ
श्रमग्रहः। दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च। समुद्रयात्रास्वीकारः कमण्डलुविधारणं। महाप्र
स्थानगमनं गोपशुश्च सुराग्रहः। अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः। असवर्णासु कन्यासु वि
वाहश्च द्विजातिभिः। हन्त स्वाध्यायसापेक्षमघसंकोचनं तथा। अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव च।
प्रायश्चित्तविधानं च विप्राणां मरणान्तिकं। संसर्गदोषः पापेषु मधुपर्के पशोर्वधः। दत्तौरसेतरे
षां तु पुत्रत्वेन परिग्रहः। सवर्णदीनाव स्नेयाः नमहापातकिनिष्कृतिः। प्रतिमाभ्यर्चनार्थाय संकल्पश्च
सधर्मकः। सवर्णान्यांगनादुष्टैः संसर्गः शोधितैरपि। शामित्रं चैव विप्राणां सोमविक्रयणं तथा॥

दीर्घकालंब्रह्मचर्यंनरमेधाश्वमेधयोःकलौयुगेत्विमान्पंचवर्ज्यानाहुर्मनीषिणः।विप्रक्षत्रियविट्छू
द्राश्चत्वारोवर्णाः।तत्रविप्रक्षत्रियवैश्याद्विजाश्च।तेषांमातुःप्रथमंजन्मउपनयनाद्वितीयंजन्म।तृतीयं
यज्ञदीक्षायांतुतृतीयंजन्म।स्त्रीणांविवाहउपनयनस्थाने।द्विजानांगर्भाधानादिकाअंत्येष्ट्यंताःक्रियामं
त्रवत्यःकार्याः।तत्रसंस्काराः।गर्भाधानंपुंसवनंअनवलोभनंसीमंतंजातकर्मनामकरणंनिःक्रम
णंअन्नप्राशनंचौलोपनयनंसावित्रीव्रतवेदव्रतारण्यकव्रतानित्यावश्यकाःषोडशप्रधानाःसंस्का
राः।तत्रऋतौगर्भाधानंकार्यं।रजःप्रवृत्तिषोडशरात्रंतंत्रऋतुकालः।गर्भचलनात्प्राक्तृतीयेचतुर्थे
मासेवापुंसवनंकार्यं।अनवलोभनंचचतुर्थषष्ठेअष्टमेवामासेसीमंतोन्नयनं।जातेपुत्रेपिताज्ञा
त्वारात्रौसंध्यायांग्रहणेवाप्रदिष्याहंस्नात्वाजातकर्मदानानिदुरितक्षयायप्रजापतिप्रीत्यैचकुर्यात्।जात
शौचांतरमध्येजातेजातकर्मचकुर्यात्।सूताशौचमध्येजातेमृतदावाशौचांतेवाकुर्यात्।नामक
रणंजातकर्मानंतरंवाद्वादशेऽह्निवाअन्यस्मिञ्शुभेऽहनिवाकार्यं।निःक्रमणंचंद्रदर्शनंसूर्यदर्शनंदेव

वर

गोदानविवाह [illegible]

तानमस्कारं वा द्वादशे ह्निवा तृतीये मासे चतुर्थे वा कार्यात् अन्नप्राशनं षष्ठे मासे अष्टमे वा दंते जाते वा कार्यं

। चौलं प्रथमे वर्षे तृतीये वा कार्यं एवं क्रमतत्वा यथा कालधर्मं वा । एते संस्कारा बीजगर्भसमुद्भवदुरितत्रयायथा

यथास्वाचारं कार्याः । स्त्रीणाममहोमकास्तूष्णीं स्युः विवाहस्तु समंत्रकः । एते कालातिक्रमे व्याहृतिहोमं कृत्वा

कार्याः । एतेष्वेकैकलोपे पादकृच्छ्रः कार्यः । चौले त्वर्द्धकृच्छ्रः । मत्या लोपे अन्नप्रादिच द्विगुणं । उपनयनात्प्रा

ग्बाला उच्छिष्टादावपि धयतानस्युः । कामचारवादभक्षाः स्युर्महापातकवर्जं । नैषां चांडालादिस्पर्शे सचैलं ते

स्नानं । प्रागन्नप्राशनात् स्पृष्टानां । प्राक्चौलादाचमनं । पश्चात्स्नानमित्येकोपित्रोः स्वधानिनयनादृते नमंत्र

रस्युः ॥ ॥ उपनयनं गर्भप्रभृति जन्मप्रभृति वा अष्टमे ह्येकादशे द्वादशे हे विप्रादीनां क्रमात्कार्यं गुरु

शुक्रादिशुभलग्नग्रहबलालाभे सति पंचमादष्टमात् आषोडशाद्द्वाविंशाद्वा चतुर्विंशाद्वांतं विप्रादीनां क्र

मात्कार्यं । अतऊर्ध्वं सावित्रीपतिता व्रात्याः स्युः । तेषामनाचीर्णप्रायश्चित्तानां उपनयनाध्यापनयाजन ग्रा वि

वाहादिकं न कार्यं । व्रात्यानां गुरुप्रायश्चित्तं वक्ष्यते । षंढांधबधिरमूकजडगद्गदपंगुकुब्जवामनरोगपार्त्त

श्लक्ष्णांगोविकलांगिश्च। मन्नोन्मत्ते च मूके च शयनस्थे निरिंद्रिये। ध्वस्तपुंस्त्वेपि चैतेषु संस्कारास्स्युर्यथोचितं।
मूकोन्मत्तौ न संस्कार्यावित्येके कर्मस्वनधिकारात्पातित्यं नास्ति। तदपत्यं संस्कार्यं। ब्राह्मण्यां ब्राह्मणेनोत्प
न्नो ब्राह्मण एवेति स्मृतेः॥ अन्ये संस्कार्या इति प्राहुः। होमं तावदाचार्यः करोति। उपनयनं च विधिनाचार्य
समीपनयनं अग्निसमीपनयनं वा सा। वित्रीवाचनं वा अस्य दंगं यथाशक्ति कार्यं विवाहस्य कन्या स्वी
कारेणपदं गामिति। औरसः क्षेत्रजाश्चैषां संस्कार्या भागहारिणः। औरसः पुत्रिकापुत्रः क्षेत्रजो गूढजस्तथा।
कानीनश्च पुनर्भूजो दत्तः क्रीतश्च कृत्रिमः। दत्तात्मा च सहोढजस्त्वपविद्धसुतस्तथा। पिंडदोंशहरश्चैषां
पूर्वाभावे परः परः। एते द्वादशपुत्रास्तु संस्कार्यास्तु द्विजातयः। के विदाहुर्द्विजैर्जातौ संस्कार्यौ कुंडगोलकौ।
अमृते तु भर्तृतयो जारजौ कुंडगोलकौ॥ ॥ कार्पाससिद्धौमगोवालशणवल्कतृणादिकं। सदा संभवतो धा यथा३
र्यमुपवीतं द्विजातिभिः। शुचौ देशे शुचिः सूत्रं संहतांगुलिमूलके। आवेष्ट्य षण्णवत्यां तत्त्रिगुणीकृत्य यत्ना
त्तः। अब्लिंगकैस्त्रिभिः सम्यक्प्रक्षाल्योर्ध्ववृतं तु तत्। अप्रदक्षिणमावृत्तं सावित्र्या त्रिगुणीकृतं। अधः प्रदक्षिणं। 3

वृत्तं समं स्यान्नवसूत्रकं। त्रिगवेष्टपृष्ठं वधाहरिर्ब्रह्मेश्वरान्नभेता यज्ञोपवीतं [illegible] सावित्र्यादि
[illegible] परममिति मंत्रेण धारयेत्। सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकं। सावित्र्याद शकृत्वोऽद्भिर्मं
त्रिताभिस्तु प्रक्षिपेत्। विच्छिन्नं वाप्यधो यातं भुक्त्वा निर्मितमुत्सृजेत्॥ यस्या ... वंशे वनाम्यष्टं ... यच्छिद्रं ते कारि
तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितं। स्तनादूर्ध्वमधो नाभेर्न धार्यं तत्कथंचन। ब्रह्मचारिण एकं स्यात्स्नातस्य द्वे
बहूनि वा। तृतीयमुत्तरीयं वा वस्त्राभावे तदिष्यते। ... यज्ञोपवीतीति। प्राचीनावीतीता
सव्ये कंठे तु निवीतीति। वस्त्रं यज्ञोपवीतार्थे ... सूत्रं च कार्पासं। कुशमुंजवालतंतुरज्जुर्वा सर्वजातिषु॥ ॥
इति यज्ञोपवीतविधिः॥ ॥कार्ष्णरौरवबास्तानि विप्रादेरजिनानि च। अहतं वस्त्रयुग्मं च श्वेतं रक्तमथापि वा। [illegible]
मौंजी त्रिवृत्समा श्लक्ष्णा दक्षिणावृत्तमेखला। मुंजालाभे तु कर्तव्या कुशाश्मंतकवल्वजैः। पालाशो वाथ सुरस
र्वेषां दंडा यज्ञियवृक्षजाः। पालाशवैल्वप्लाक्षास्ते दवेतसखादिराः॥ पैलवौदुंबराश्वत्थाः क्रमाद्विप्रादिषु स्म
ताः। ते केशान्तललनाशीन्तप्रमाणाश्च क्रमाद्द्विजैः। धार्याः श्लक्ष्णाः सदा धार्यं कौपीनं कटिसूत्रकं। कौपीनमहतं तथा।
यथाविधि ... मौंजी त्रिवृत्स्याद्दक्षिणावृता॥ ३

7

र्यं षंडं वा वस्त्रपार्श्वं पुरुषायत्तोपवीतमजिनं मौंजीं दंडं च धारयेत्। नष्टे भ्रष्टे नवं मंत्राहृत्वाप्सु भ्रष्टं जले क्षिपेत्॥ उपनयनानं
तरं त्रिरात्रं द्वादशरात्रं वर्षं वा अक्षारालवणाशी अधःशायी ब्रह्मचारी उपनयनव्रतं चरेत्॥ सर्वत्र व्रतांते नवानि यज्ञो
पवीतादीनि धृत्वा ह्यर्धाणि त्यजेत्। वस्त्राणां त्यागानियमः॥ नित्यं स्वाध्यायाग्निकार्यब्रह्मयज्ञतर्पणानि कुर्वन्न
अनिंद्यप्रविप्रगृहेषु भैक्षं गुर्वनुज्ञया याचित्वा भोजनविधिना भुंजानो द्वादशाब्दं पंचाब्दं वा वेदग्रहणांतं वा ब्रह्मचारी
व्रतं चरेत्॥ गुरुशुश्रूषा छंदसां साधनार्थं कुर्यात्॥ उपाकर्मांतिके सर्वेषां वेदव्रतानां तत्र स्त्री मधु मांसोच्छिष्टशु
क्तपर्युषितताम्बूलदंतधावनावसक्थिकादिवास्वापछत्रपादुकागंधमाल्योद्वर्तनानुलेपनांजनजलक्री
डाद्यूतनृत्यगीतवाद्यालापाश्लीलपरिवादादीनामभावर्तनाद्वर्जयेत्॥ तदेकापोह्य व्याधौ मधुमांसं गुरूच्छिष्टं च
दंपा॥ आद्ये तु वर्ज्यमेवा॥ उपनयनव्रतानन्तरं सावित्रीव्रतस्योपाकर्मांतं॥ आरण्यकव्रतानि च तथैव वा॥ उपाकरणमो
षधिजनने सति श्रावण्यां पौर्णमास्यां कार्यं॥ श्रावणमासस्य श्रवणे वा पंचम्यां वा हस्ते वा पंचमीहस्तयोगे वा कौ
यं ता भाद्रपदमासस्य पौर्णमास्यां श्रवणे वा हस्ते वा आषाढ्यां पौर्णमास्यां वा यथास्वाचारं कार्यं॥ श्रवणे आद्ये घटिका

नैतर

सप्तसूत्रो

४

चतुष्टयमभिजितनक्षत्रांशं वर्ज्यं वा॥ तिथिखंडे सति उदयव्यापिनी प्रयोगपर्याप्ता तिथिरुपाकरणे ग्राह्या॥ श्रवणे
खंडे सति धनिष्ठासंयुतं प्रयोगपर्याप्तं ग्राह्यं। नोत्तराषाढसंयुतं। हस्तादिष्वन्यनक्षत्रे तु शुक्लपक्षे उदयव्यापि कृष्ण
पक्षे समयव्यापि प्रयोगपर्याप्तं ग्राह्यं। सूतकादिविघ्नसंभवे चतुर्षु पक्षेष्वप्यलाभे च श्रावणभाद्रपदयोः कस्मिंश्चि
द्दिने ग्रहसंक्रान्तिवर्जिते कार्यं कर्मणो न लोपो नोत्कर्षः॥ मौंजीयज्ञोपवीतादि नवं दद्याद्धारयेद्वा कटिसूत्रं च
नवं नवं वस्त्रं तथैव च। उपनयनादुपाकर्मान्तं सावित्रीव्रतं तत्संपूर्त्यर्थं विप्रसंबंधिबांधवभोजनं शक्त्या कार्यं
ततो वेदव्रतं। तत आरण्यकं वेदव्रतानि प्रतिव्रतं वपनं व्रतान्ते भोजनेन सैव समाहार्यं। एतेषु व्रतेषु लोपे तार
तम्येन त्रिषड्वा द्वादश वा कृच्छ्रं चरित्वा पुनः स्वव्रतं पारलेत्॥ ॥ततोऽनन्तरं वा उदगयने वा शुक्लपक्षे शुभेऽहनि
स्वाध्यायं पारलेत्। पूर्ववद्गणेशं सरस्वतीमिष्टदेवं गुरुं तं तं च पूज्य ब्रह्मचारिविप्रसुवासिनीभ्य आशिषो
गृहीत्वा ब्रह्मयज्ञवदनीत्यारयमाणः प्रणवव्याहृतिसावित्रीरुक्त्वा प्रणवपूर्वं स्वाध्यायं पारस्य किंचिदधीत्य
प्रणवेन समाप्य विरामोऽस्त्वित्युक्त्वा भूमिं स्पृष्ट्वा गुरुवृद्धान्नमेयुः। ततोऽपरेद्युः प्रभृति गणेशादीन्नत्वा गुरुं वंदनत्वा

श्वी।

श्री। प्रणवेन प्रारंभं समाप्तिं च कुर्युः। जात्पावारसंशयेनाप्याप्याः।। ।।ब्रह्मचारी संध्यामुपास्याग्निकार्यं कृत्वा गुरुमुप

संग्रहणं वृद्धतरेष्वभिवादनं। वृद्धेषु नमस्कारं कुर्य्यात्। उपसंग्रहणं नाम अमुकगोत्रो देवदत्तशर्म्माहं भो अ

भिवादयेऽहमस्त्रस्का कर्णौ स्पृष्ट्वा दक्षिणोत्तरपाणिर्दक्षिणेन पाणिना गुरोर्दक्षिणं पादं सव्येन सव्यं गृहीत्वा अभि

गोवन्नमनं अभिवादने पादग्रहणं नास्ति। पादस्पर्शनं कार्यं न वा। आयुष्मान्भव सौम्य देवदत्ता इति स्तुतं तं गु

रुस्का। अमुकशर्म्मन् इति प्रत्यभिवादः कार्यः। आयुष्मान्भव सौम्येति वा प्रत्यभिवादः। अत्र गुरवो माता ह्न्य

धीत्री वा पिता पितामहादयो मातामहश्चान्नदाता भयत्राता वा यश्चोपनेता वा मंत्रविद्योपदेष्टा च तेषां पत्नी

पसंग्राह्याः। समानेन वा बाले समवयस्के अध्यापकेषु त्रवधरेत्। मातुलाश्च पितृव्याः श्वशुराश्च यवी

यसोपि प्रत्युत्थायाभिवाद्या उपाध्यायकात्विजो ज्येष्ठभ्रातरश्च सर्वेषां पत्न्यश्चैवं मातृष्वसा पितृष्वसा

वसवर्णा भ्रातृपत्न्यश्च विनित्यं मभिवाद्याः। विप्रोष्य रूपसंग्राह्या ज्ञातिसंबंधियोषितः। विप्रोष्य विप्रं कुश

लं पृच्छेत् क्षत्रं पपनामयं वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव वा न वाच्यो दीक्षितो नाम्ना यवीयानपि सर्वथा

५ देवदत्तशर्मनूअ

श्चे

५

६ आयुष्मान्भव सौम्येति वा प्रत्यभिवादः ५

पूज्यैस्स मभिलापेत्तसोसोवत्कर्मनामभिः॥ परस्यैपत्नीमसंवंद्धालगिच्यंवेत्तिलापयेत्॥ त्रिवर्षः पूर्वश्रोत्रियो
लिवाद्यः॥ अत्रिवर्षा सर्वं क्षिनश्चस्वल्पेनापिवयोनिजाः॥ अन्यैवस्तानहद्धाः सदावाराश्चा लिवाद्याः॥ उदक्यां
सूतिकां नारीं भर्तृघ्नीं गर्भपातिनीं॥ पाषंडं पतितं व्रात्यं महापातकिनं शवं॥ नास्तिकं कितवं स्तेनं कृतघ्नं ना
लिवादयेत्॥ मत्तं प्रमत्तं सुन्मत्तं धावन्तमशुचिं नरं॥ वमंतं जृंभमाणं च कुर्वंतं दंतधावनं॥ अभ्यक्तशिरसं
स्नानं कुर्वंतं नाभिवादयेत्॥ जपयज्ञजलस्थं च समित्पुष्पकुशानलान्॥ उदपात्रार्घभैक्षान्नं वहंतं नाभि
वादयेत्॥ अभिवाद्य द्विजं श्रेष्ठं तानहोरात्रेण शुध्यति॥ तत्रैव श्मशानेभिवादने विप्रस्यैवं शूद्राद्यभिवादने
त्रिरात्रं कार्यं रजकादिश्चांडालादिषु चांद्रं छायादिति संग्रहकारस्मृतं॥ देवताप्रतिमां दृष्ट्वा यतिं चैव त्रि
दंडिनं॥ नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति॥ सर्वत्रापि नमस्कार्यः सर्वत्र च्छात्रसर्वदा॥ अभिवादे
नमस्कारस्तथा प्राप्य अभिवादनं नमाशीर्वादा॥ नमस्कार्यैर्वधस्य स्नुषा पुनर्न नमेत्॥ स्त्रियो नमस्था न्न्द्धाश्च
यसापत्नुरन्यतः॥ ततोधीयीत वेदांश्च स्वाध्याये गुरुशिक्षिताः॥ ॥अथानध्यायावसरः प्रोक्तः॥ ॥अनध्यायेषु

गौधे सूक्तौ

ने४

आ ध्ययनेवैप्रजानामायुःप्रमांछ्रियंब्रह्मवीर्यंश्रियंतेजोनिकृंततियमःस्वयं।मंत्रवीर्यत्वयत्याद्दिंद्रोवज्रेणहंतिवा
।ब्रह्मराक्षसतांचांतेनरकंचलवेक्ष्वं।अष्टमीचचतुर्दशीपर्वप्रतिपत्तुनित्यमहोरात्रमनध्यायः।अष्टका
सुच।एद्वाश्रावणद्वादशीमघाकरणपौर्णासोपपदतिथौवा।शयनोत्थानद्वादश्यापौर्णा।आषाढीकार्त्तिकी
२घी फाल्गुनीसमीपस्थद्वितीयासुच।अपरपक्षेपितद्वितीयायांवामहानवम्यांरथसप्तम्यांवायुगादिषुच।
शुक्लात्तृतीयावैशाखेप्रेतपक्षेत्रयोदशी।कार्त्तिकेनवमीशुक्लामाघेदर्शश्चपूर्णिमा।एतायुगादयः
प्रोक्तादत्तस्याक्षयकारकाः।मन्वंतरादयःसर्वेअनाध्यायाइतिकेचन।अश्वयुजिकृष्णशुक्लनवमीकार्त्ति
केद्वादशीसिता।तृतीयाचैत्रमासेतुसप्तमीतुलाद्वपदस्यच।आषाढेशुक्लदशमीमाघस्याशुक्लसप्तमी।
श्रावणस्याष्टमीकृष्णातथाषाढीचपौर्णिमा।फाल्गुनस्यत्वमावास्यापौषस्यैकादशीसिता।का
र्त्तिकीफाल्गुनीचैत्रीज्येष्ठीपंचदशीसिता।मन्वंतरादयश्चैतादत्तस्याक्षयकारकाः।शवानुगम
नपरिचरणोभुवाः।काशशवदर्शनेवाहोरात्रं।श्राद्धिकंप्रतिग्रहयवाराणेकमधीत्यचमनुष्यप्रभृती ६

स्वन्नारवा॥ ज्ञातियमरणे येवी ४

व~ स्थान ८

नांचदेवानां नागादीनां चैअक्षौ वाहोरात्रं॥ अशांतमितपेकेनव श्राद्धभक्तौ त्वन्नजराणां तेसूतकान्नभोजने चैवैमंहे
कोद्दिष्टे त्रिरात्रं गंधलेपक्षयांतं वा महागुरुष्टौ द्वादशरात्रं वा असपिंडगुरौ त्रिरात्रं॥ आचार्यवदुपाध्याये पक्षि
णी समानविद्ये सब्रह्मचारिणि च आचार्यभार्यापुत्रशिष्येष्वहोरात्रं ज्ञात्वियाज्यौ योनिसंबंधिषु चैवं असुत्या
ते गोविप्रहतौ त्रिरात्रं वेदसमापने प्रथमसंस्कारस्तदहोरात्रं परेद्युश्चानध्यायः अग्न्युत्पातरात्रौ मोक्षे त्रिरात्रं॥ स्वि
मोक्षे त्रिरात्रं उपाकर्मणि चोत्सर्गे अहं अयने विषुवे पक्षिणी निर्घातभूकंपोल्कानिपातादि सर्वर्तुकेष्वाका
लिकोनध्यायः॥ असुत्याते वा कालवृष्टौ आर्द्रादि जेष्टांतात्कालादन्यत्राकालवृष्टिः। सायंसंध्यागर्ज
ने उदयान्तोनध्यायः॥ अर्धरात्रादूर्ध्वं गर्जने अर्धरात्रे वा कालिकोनध्यायः। प्रातःसंध्यागर्जने त्वहोरात्रं॥ ।।का
कोलूककुक्कुटश्वखरकमंडूकाद्यंतरागमने सतिदिने चेत्॥ दिनान्तेरात्रौ वेद्रात्र्यंतं वा॥ अनाध्यायः॥ गवाश्व
महिषपशुस्त्रीशूद्रादावहोरात्रं श्वमार्जारयोश्च॥ आरण्यमार्जारसर्प्पनकुलपंचनखासौ त्रिरात्रं॥ आरण्यश्व
सृगालादि वानररजकादौ द्वादशरात्रं खरखराहोष्ट्रादि वंडालादिसूतिकोदक्याशवादौ मांसं गोखरौ वयाआ

स्व२

दि

श्रा.

वृद्धोजनास्त्रिकादौत्रिमासं।शशमेषसृपाकादौषण्मासं।गजगोंडसारशींसिंहव्याघ्रमहापापिहतश्वादावष्ट
मनध्यायः।स्वाध्यायेवाप्रवचनेवर्त्तमानेअन्तरागतेआधिव्याधिस्थस्तुविप्रपापानिगुरुशिष्ययोः।शोसन
दिनेशोसनष्टेहेवानध्यायः।विवाहमौंजीबंधप्रतिष्ठोद्यापनादिष्वामार्ज्जनमासमास्तेः।सपिंडसगोत्राणा
मनध्यायः।यज्ञेवानुबंधांतं।आत्विजामाचार्याणांच।श्वोनध्यायेसत्याद्यरात्रौअनध्यायएकानध्यायभ्रुगम
त्वेत्वेतपापररात्रेनानध्यायः।अनाध्यायद्रुग्रामेशर्वदिनापररात्रेवेत्येके।श्वक्रोष्टुगर्दभोलूकसामवीणात्रं
निस्वने।अमेध्य[illegible]शवशूद्रांत्यश्मसीनपतितांतिके।देशेशुचावात्मनि।चविद्युत्स्तनितसंप्लवे।भुक्त्वा
र्द्रपाणिरंभोंतरर्द्धरात्रेतिमारुते।पांशुवर्षेदिशांदाहेसंध्यानीहारभीतिषु।धावतःपूतिगंधेचशिष्टेचगृह
मागते।खरोष्ट्रयानहस्त्यश्वनौवृक्षगिरिरोहणे।सप्तत्रिंशदनाध्यायानेतांस्तात्कालिकांविदुः।सर्वकालि

रि

तंगांभेशुपरिवेषसत्तासुच।अस्वनक्तंस्नानकालेचमहाघ्रदेतिकंपने।गोविप्ररोधनेसर्वशद्बेष्वश्रा।इर्पंक्ति
षु।शाल्मलस्यमधूकस्यकोविदारकपित्थयोः।श्लेष्मातकस्यछायायांचेतितात्कालिकान्विदुः।अंच

७

या३

नुर्दश्यष्टमीपर्वप्रतिपद्वर्जितिथ्यावा वेदांगन्यायमीमांसाधर्मशास्त्राणि वा स्पसेत्॥ उदयेस्तमनेवापिमुहूर्त्तत्र
यगामिधत्तातद्दिनंतदहोरात्रमनध्यायविधौविदुः॥ कोविदाकुंकविदेशेयावन्नाद्दिननाडिकांतावदे
वत्वनाध्यायोनतन्मिश्रादिनान्तरेगपर्वासभूतादीनांतिथिमान्तुसप्थेवतेवत्त्र्यर्पः पूर्वरात्रेऽनवनाडी
५ सुदर्शने।नाध्येयंपूर्वरात्रेस्यात्सप्तमीचत्रयोदशी॥ अर्द्धरात्रात्परस्यावेन्नाध्येयंपूर्वरात्रकं॥ प्रणवव्या
हृतीनांचसावित्र्याःशिरसस्तथा॥ नित्यनैमित्तिकेकार्येव्रतेयज्ञेक्रतौतथा॥ पश्चन्नेकाम्यकार्येवनानध्या
यास्मृताःतथा॥ देवतार्चनमंत्राणांनानाध्यायाःस्मृतास्तदा॥ ॥अथोत्सर्जनं॥ ॥ततःसार्द्धचतुर्म्मासान्ष
ण्मासान्वाधीत्यपौषमासरोहिण्यामष्टकायांपौषेमाघेफाल्गुनेवाशुक्लपक्षेप्रतिपद्यन्यास्मिन्वांह्नि
पौर्णमास्यांवासशिष्योग्रामाद्बहिर्जलांतेगत्सनेकार्येतर्प्पणंचावर्षवाधीत्योवापाकर्मदिनेउत्सर्ज
नेकार्येनवातर्प्पणंतुकार्यमेवा एवंवेदंव्रतानिचोत्तयंवापारंनीत्वा अविच्छुतब्रह्मचर्योविप्लवेद्वातप्रा
यश्चित्तोगुरुंसंपूज्यतदनुज्ञयासमावृत्तोविवाहेत्॥ ॥इतिब्रह्मचारिप्रकरणं॥ ॥अथविवाहः॥ ॥

ज१

आ०

२८

मातृतः पितृतश्चशुद्धां मतिरूपांगुणान्वितां ॥ अदीर्घरोगां संवारिरोगपातित्यवर्जितां असपिंडां च पितृतः सप्त
मातुश्च पात्परं मातृतः पंचमादूर्ध्वं असमानार्षगोत्रजां ॥ अनन्योढां भ्रातृमतीं स्त्रियं कन्यां यवीयसीं ॥ उप
त्रीमान्वरो धीरो द्विजो वर्णात्रिवर्णतः ॥ विवहेद्धर्ममार्गेण ब्राह्मादिषु यथाविधि ॥ मातुलस्य सुतां के
चित्पितृष्वसुतादिकां ॥ विवहंति कचिद्देशे संकोच्यापि सपिंडतां ॥ दद्याद्वदति दृष्टीयात्स्नात्येव वसुसमाहि
तः ॥ ब्राह्मो विवाहस्त्वाहूय दीयते शक्त्यलंकृता ॥ दैवो विवाहः कन्याया ऋत्विजे दानमुच्यते ॥ आर्षो गो
मिथुने दत्ते कन्यादानं यदा तदा ॥ प्राजापत्यः सहधर्मं चरितेति दानतः ॥ आसुरो द्रविणाद्दानाद्गां
धर्वः समयान्मिथः ॥ राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात् ॥ ब्राह्मो दैवार्षप्राजापत्या धर्म्याः
॥ आसुरगांधर्वराक्षसपैशाचास्त्वधर्म्याः ॥ तत्राद्याश्चत्वारो विप्रस्यैव ॥ राक्षसः क्षत्रियस्यैव ॥ इतरे त्रयः
सर्वेषां ॥ ब्राह्मादिषु पूर्वं होमः प्रशस्तः ॥ पश्चात्कन्यास्वीकारः ॥ असुरादिषु पूर्वं कन्यास्वीकारः प
श्चाद्धोमः कार्यः ॥ पिता पितामहो भ्राता पितृव्यो गोत्रजो गुरुः ॥ मातामहो मातुलो वा कन्यादा बांधवाः ॥

कार्य

त्री

क्रमात्। पित्रादिदात्रभावे तु कन्या कुर्यात्स्वयंवरं। शुल्कं दत्वा वरेयात्ते पंचत्वं संप्रतीक्ष्य त्रयं। कन्यान्यस्मै प्रद
तव्या वाग्दाने तु कृते सति। वरे देशांतरगते ऋतुत्रयं प्रतीक्ष्य। कन्यान्यस्मै प्रदातव्या वाग्दाने तु कृते वरे दु
ते न्यस्मै तथा देया दुष्टे तस्य परा तु या। प्रज्ञा रूपसंयोगान्मृते देयेति केचन। मता वरदुष्टे कन्यैव तु न देयेति केच
न। आगर्भधारणात्कन्या तु न देयेति वा परे। देशकालादि मेधर्मा प्रचुष्टेया विजानता। कुलशीलविहीनस्य
षंढादेः पतितस्य च। अपस्मारिविकर्मस्थरोगिणां वेषधारिणां। दत्तामपि हरेत्कन्यां सगोत्रोढां तथै
व च। मंत्रसंस्काररहिता देयान्यस्मै न रायतु। कन्या च दूषिता वर्ज्या देयान्यस्मै वराय सा। अन्यथा तु हरं दं
डो द्वयं दद्याच्च सादर्यं। षंढांधवधिरादीनां विवाहो स्त्रियोचितो। विवाहासंभवे तेषां कनिष्ठो विवहेन्नरः।
षंढांधवधिरस्तब्धजडगद्गदपंगुषु। कुब्जवामनरोगार्तशुष्कांगविकलांगिषु। ध्वस्तं स्वैरमत्तेव भयनष्टे
निरिंद्रिये। ष्टक्रोन्मत्तेषु सर्वेषु न दोषः। परिवेदने। पितृव्यपुत्रे सापत्ने परदारसुतादिषु। विवाहाधानय
ज्ञादौ परिवेदाद्यदूषणं। ज्येष्ठभ्राता त्वकृतश्चाते परिवेदाद्यदूषणं। पिंडः सतापप्रज्ञाने नाधीनकथं च नाप

वरे

स्यात्

व

रि

॥णिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरं वैश्या प्रतोदमादद्याद्विवाहे ब्राह्मणस्य तु ॥ सवर्णेभ्यः सवर्णासु जा
यंते हि सजातयः । अनिंद्येषु विवाहेषु पुत्राः संतानवर्द्धनाः ॥ विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशस्त्रियां ।
अंबष्टः शूद्र्यां निषादो जातः पारसवोपि वा । वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ ॥ वैश्या
त्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः । एते त्वनुलोमजाः पुत्राः संस्कार्यास्तु द्विजातिवत् । तथा मूर्द्धावसि
क्तादिजातिजाश्च द्विजातयः । ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा । शूद्राज्जातस्तु चांडालः सर्व
धर्मबहिष्कृतः । क्षत्रिया मागधं वैश्यात्शूद्रात्क्षत्तारमेव च । शूद्रादायोगवं वैश्या जनयामास वै सुतं ।
माहिष्येण करण्यां तु रथकारः प्रजायते । इत्याद्याः प्रतिलोमाः स्युर्द्विजधर्मबहिष्कृताः ॥ विवाहात्प
रमाधाय गृह्ये देवाग्निहोत्रकौ । दर्शपूर्णमासाग्रयणसोमयागांश्च मासेवरेत् । सर्वयाज्ञयमः सोमया
गः कार्यो द्विजातिभिः । यथासंभवविनियोगेन फले दत्वापि दक्षिणां । ब्रात्यस्तु ब्राह्मणत्वादि महादोषोप
शांतये । सूर्यग्रहे तु चंद्रे मेषी कृष्णाजिनादिकं । चांडालानतिदृष्ट्वापि यजेत्तावश्यकं मखैः ॥

८

अथवौपासनं कृत्वा तु कुर्यात्कर्माणि चाचरेत्। अर्द्धाधाने महाश्रेयो गार्ह्यश्रौतोलयात्मकं। एकत्वं स्त्रीगता
भर्तुः पिंडे गोत्रे च सूतके। सत्यामत्यां सवर्णायां धर्मकार्यं न कारयेत्। सवर्णासु विधौ धर्म्ये ज्येष्ठया धान
विनेतरा। आज्ञासंपादिनी दक्षा ऽवरस्थप्रिया सुवि।। नियोज्या धर्मकार्येषु नाधिवेद्या कथंचन।
शक्तालक्ताश्च विर्द्दत्वा नियोज्या धर्मकर्मसु। अशुद्धां जारिणीं दुष्टां दूषितां च विवर्जयेत्। सुरापी
व्याधिता धूर्त्ता वंध्यार्थघ्नाप्रियास्त्रावि:। स्त्रीप्रसूश्चाधिवेत्तव्या पतिद्विट्सततं प्रजा।ऽष्टहछसु षड्भिः
स्यात्पंचाग्निश्चतुरग्निकः। स्यात्त्र्यग्निरथैकाग्निर्नाग्निहीनः कथंचन। गार्ह्यमौपासने कुर्यात्सर्वोश्च
नीउ लौकिके। स्मार्त्तं च लौकिके कार्यं श्रौतं वैतानिकाग्निषु।। ।।अथात्र गोत्रप्रवरनिर्णयो वर्ण्यते ज
मा। जमदग्निर्भरद्वाजविश्वामित्रात्रिगौतमाः। वशिष्ठकश्यपागस्त्या मुनयो गोत्रकारिणः। एतेषां यान्य
पत्यानि तानि गोत्राणि मन्वते। प्रियमाणा तथा वापि सन्तपावानुवर्त्तनं। एकस्य हरपतेयत्र तज्ज्ञोत्रं तस्य
कथ्यते। समानस्तु निरूपस्त्वमेकप्रवरतामपि। समानप्रवरत्वं च द्विधा बौधायनोत्रवीत्। तु निषणीतप्र

प्रि२

स्मृ॰ आ॰

१॰

वैरत्वेन पंचाशता वयं॥ अनंतान्यपि गोत्राणि वर्गीकृत्यानिदर्शहो जामदग्न्या वत्सविदा वार्ष्टिषेणाः पर
स्परं॥ नाविवाह्याः प्रवरैक्येन सगोत्रत्वेन चादिमौ॥ यस्का मित्रयुवो वैन्याः शुनकाः प्रवरैकतः॥ स्वं स्वं हित्वा ग
णं सर्वे विवाह्याः परावरैः॥ उक्ताः सप्त भृगोर्वंशा वक्ष्यंतेंगिरसो मया॥ गौतमाः सप्त चायास्यशारद्वतमथा
परे॥ कौमंडा दैर्घतमसा तजः का रेणुपालयाः॥ वामदेवा औशनसगोत्रर्ष्यैकाद्वनाविवाह्याः शरद्वाजाश्च क
पयो गर्गा रौक्षायणाः शतौ॥ चत्वारो पि भरद्वाजा गोत्रैक्यान्नाविवाह्या मिथः॥ केवलांगिरसस्त्वेते विष्णुवृ
द्धाः सकाएव जाः॥ हारितारथीतराश्च मुद्गलाः प्रवरैकतः॥ स्वं स्वं हित्वा गणं सर्वे निव हेयुः परावरैः॥ षोड
शांगिरसस्त्रेधा प्रोक्ताः संकृतयस्तथा॥ संकृतीनां द्विवंश्यत्वाद्दशिष्टैश्च चतुर्विधैः स्वस्ववर्गीयैः सगो
त्रत्वात्प्रवरैक्याद्वनात्रियुः॥ चत्वारोत्रेयश्चाद्या निवाह्यन्तके गविष्टिराः॥ मुद्गलाश्चेति गोत्रैक्यात्प्रव
रैक्याद्वनाविवाह्याः॥ त्रयश्च कश्यपगणा निध्रुवा रेभ शंडिलाः॥ गोत्रैक्यात्प्रवरैक्याद्घनोद्वहेयुः परस्प
रं॥ ॥ वासिष्ठाः कश्यपैर्न्निम्पंनोकौ त्रीणामनन्वयाः॥ अहर्वसिष्ठतोनिक्रप्रपाज्पाद्याद्दिगोवराः॥ वासि

मा॰ स

श्चाकौंडिनाश्चैव वसुपमन्युपराशराः। वसिष्ठा इति चत्वारो गोत्रैकंया नाविशुर्म्मिथः। कुशिका रोहिता गार्ग्यरौ
क्षकाः कमलांकायनाः। कताधानंजयाश्चाजाश्च अघमर्षणपौरणाः। इंद्रकौशिकजाश्चेति विश्वामित्रग
णाः दशानोद्वहेयुः सगोत्रत्वात्कचित्प्रवरैक्यतः। अगस्त्याः संभवाहाः सोमवाहा इति त्रयः। गोत्रैक्यात्प्रवरैक्या
च नोद्वहेयुः परस्परं। वर्गा एकोनपंचाशत्प्रसिद्धा मुनिलिष्टैनाः। अप्रसिद्धाः परे वंशाः अनंतर्हिता इहैव तु। विश्वा
मित्रात्रिगोत्रैश्च नोद्वहेयुर्द्धनंजयाः। अत्रेः कृतानि काश्च वामरथ्यादयस्तथा। तथैव जातूकर्ण्याश्च वसि
ष्ठैरत्रिभिः सह। भारद्वाजेन शुंगेन विश्वामित्रस्य शैशिरैः। तेन जातो द्विगोत्रर्षिः प्रोच्यते शौंगशैशिरिः।
विश्वामित्रभरद्वाजैस्सन्तूनां तेन नाचरः। कपिलानां भरद्वाजैर्विश्वामित्रैश्च नाचरः। गुरोः सगोत्रप्रवरा
नोद्वाह्याद्वत्रविज्ञानैः॥ ॥ स्वगोत्राद्यनतिश्चविप्रैराचार्यगोत्रजाः। दानादिनान्यगोत्रास्तु रक्षात उत्र
गोत्रिणः। समानप्रवरोद्वाहनिषेधः स्वत्र वैश्ययोः। प्रवराभानवेतयोस्मात्प्रवराया नगोत्रस्तुत्यं सगोत्र
संबंधविवाहविषये स्थिते। यदि कश्चिदज्ञानतस्तां कन्यामुद्वोपगच्छति। गुरुतल्पव्रतं कुर्यात्तत्सर्जेत्पतां ब्रज

श्रु द्रु स्म है न्य२ यौम्य२

स्मृ॰ आ॰
११

दें॰। स्क
मानीमिवाअज्ञानाद्वै देवैश्च ह्यौ हि तिग र्तक्क कश्यपाः। महद्भिर्म्मह तोयता क्व
त।। लोगा तस्मां परित्यज्य पालयेज्जननी॥ विवा
ता। लोगा तसां परित्यज्य पालयेज्जननीमिवा अज्ञानाद्वै देवैश्च ह्यौहि तिगर्तक्क कश्यपाः। महद्भिर्म्मह तोयता क्व
त।। लोगात स्मां परित्यज्य पालयेज्जन नीमिवा॥ अज्ञानाद्यैर्देवैश्च ह्यो हि ...

तः प्रवरनिर्णयसंतति। जामदग्न्यावत्सविदा आर्ष्टिषेणास्तथैव च। पंचावत्तिन एवान्ये सर्वे चत्ववत्तिनः॥ विवाहेवि
ततंतंत्रे होमकाले तु पृच्छिते। कन्यास्तु भर्तारं इच्छाकथं कुर्वंति याज्ञिकाः॥ ज्ञापयित्वा ततो कन्यां वर्जयित्वाथ
तते तंत्रे होमकाले तु पृच्छिते। कन्यास्तु भर्तारं इच्छा कथं कुर्वंति याज्ञिकाः॥ ज्ञापयित्वा ततो कन्यां वर्जयित्वाथ
था विधि। भुंजानमौ कृतिं कृत्वा ततश्च कर्म्म प्रवर्त्तयेत्॥ यद्वा विवाह होमे च क्वोन्तेय दिक याऽरजस्वला। त्रिरा
त्रं दंपती स्यातां पृथक् शय्यासनाशनौ। चतुर्थे हनि संस्नातौ तस्मिन्नग्नौ यथाविधि। विवाह होमं कुर्यातां
मित्यादि स्मृतिसंग्रहः॥ विवाहे दंपती स्यातां त्रिरात्रं ब्रह्मचारिणौ। अलंकृता वधूश्चैव सहसय्याशनाशनं
। अथ धर्म्मेषु विवाहे कृते तु चूलमतुमोदनं। हवनं भोजनं चैव सर्वथा वर्जयेद्विजः॥ आभरेदुपवासस्या ज्ञं
षडर्दे आत्रिरात्रकं। राजसे चैव पैशाचे कार्यं चांद्रायणं तथा॥ गर्भाधानादिसंस्कारे शिष्टाः ह् तं कृषिष्ठपि
वृद्धि श्राद्धं पुरा कार्यं कर्म्मादौ च स्वमिवा चनं। वृद्धस्त्वक्षापितरो वृद्धिश्राद्धे भुंजते। चूडाहोमवसाने तु व
लमुख्याः प्रभुंजते ॥ वसवो रुद्रा आदित्याश्च वह्नाः॥ काम रूपिणः॥ बाला युवानो वृद्धाश्च पितृगणा माघ्न

अ
१२

याः स्मृताः॥ घेतानामाअपां रुद्रायमस्थैवांतकाः स्मृताः॥ असंस्कृतप्रमीतानां स्त्राविग्रुणंसमाश्रयः॥ अन्नाश्रयाणां
जीवानां स्तनं नैवोपतिष्ठते॥ प्रारंभात्तु द्वर्समाशौचे विवाहः कार्य एव तु॥ प्रारंभो वरणं यज्ञे संकल्पो व्रत सत्रयोः॥ नांदी
श्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया॥ निमंत्रणं वा श्राद्धे तु प्रारंभस्यादिति स्मृतिः॥ गा॥ शः॥ क्रियमाणेना
प्तकं स्यान्मातृपूजनं॥ इति श्राद्धं वतं तंस्माद्दोमासुप्रसुष्टथरू ष्टथरू॥ ॥अथाह्निकमुच्यते॥ ॥ततः प्रभाते तत्स्मार्ये
ष्टदेवं मनसा विज्ञापयित्वा तदहः कृत्यं स्मृत्वा संध्योपासनं कुर्यात्॥ तत्र मूत्रपुरीषोत्सर्गमेवं कुर्यात्॥ अवानस्य त्या
प्रारिकस्रुक्काष्ठलोष्ठतृणपर्णादिकं गृहीत्वा शिरः प्रावृत्य यज्ञोपवीतं निवीतं कृत्वा॥ कंठविलंबितं कृत्वा
एकवस्त्रश्चेद् दक्षिणे कर्णे निधाय दिगवलोकनं च कृत्वा काष्ठाद्यंतर्हितं कुर्यान्न वा मौनं वायुमनं वा प्राणस्य
पिधानं वक्रमाहृत्वा दिवा संध्ययोरुदङ्मुखो रात्रौ दक्षिणामुखो मूत्रपुरीषोत्सर्गं कुर्यात्॥ फालकृष्टे जले
चित्यां वल्मीके गिरिमस्तके देवालये नदीतीरे दर्भपुष्पे श्मशाने चले सेव्यच्छायायां वृक्षे मार्गे गोष्ठांबुभस्म
सु॥ अग्नौ च गच्छंस्तिष्ठन् विशेषतः पूर्वं च नोत्सृजेत्॥ वाय्वग्न्यर्कं हि गां सोमं संध्यां तु स्त्रीद्विजन्मनः प्रत्यक्षं तिष्ठन्

सो॰

श्रोतान्नविष्टं मूत्रं च नोत्सृजेत्॥ सर्वे निषेधा नैव स्युः प्राणबाधालये शुभाः॥ काष्ठादिनान्तर्धायानघ्नममेध्यं निसृ-
जीत वा॥ रथ्याचत्वरतीर्थभस्मश्मशाने गोमये जले॥ अंगारोद्यानसस्यानि यज्ञभूमिं च नोत्सृजेत्॥ कंदमूलफ-
लं गारे त्वमेध्यं निसृजेद्बुधः॥ ॥इति मूत्रपुरीषोत्सर्गविधिः॥ ॥अथ शौचविधिः॥ ॥शौचे यत्नः सदा कार्यः
जीतव शौचमूलो द्विजः स्मृतः॥ शौचाचारविहीनस्य समस्तं कर्म निःफलं॥ शौचं च द्विविधं प्रोक्तं बाह्यमभ्यन्तरं त-
था॥ मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरं॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः॥ गंधलेपक्षयकरं
शौचं कुर्यादतंद्रितः॥ अन्तर्जले देवगृहे वल्मीके मूषकस्थले॥ कृतशौचावशिष्टा च न ग्राह्याः पंच मृत्तिकाः॥
मार्गोत्खरश्मशानस्थाः पांसुला मालिनीस्त्यजेत्॥ कीटांगारास्थिरहितामाहरेच्छर्करान्वितां॥ वापीकूपतडागे-
भ्यो नाहरेद्वाप्यमृत्तिकां॥ अन्तर्जलगताग्रीवा हस्तो मात्रिवंधनात्॥ आरोपकेषु त्वेवं स्याद्ध्यापिष्ठाहरणे
मृदो। विदुः॥ एका च मृत्तिका लिंगे तिस्रः सव्यकरे मृदः॥ करद्वये मृद्द्वयं स्यान्मूत्रमात्रे मनेकधा॥ त्रिपर्वपूर्वमात्रा च र
मृत्तिका त्वप्रमाणिका॥ आर्द्रामलकमात्रा वा हस्त्या शौचे तु मृत्तिका॥ मूत्रवद्द्विगुणं शुक्ले मैथुने त्रिगुणं स्मृतं॥ १२

पुरीषे तु पंचापानेस्य दश द्वोष्पाः करे वामे दश स्मृताः करयोस्सप्त दातव्याः पुरीषे मृत्प्रमाणकं। अर्द्धप्रसृतिमात्रा चाद्यास्तु
दद्यात्सु सततः पराः। यद्वापाने मृद दश द्विःप्रसृत्यर्द्धत्रिलागिकाः। यदा प्रसृतिमात्रा त्रिः पायो पाणौ पृथक् पृथक्। प
तच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणं। दिवा यद्विहितं शौचं तदर्द्धं निशि
कीर्तितं। तदर्द्धमातुरे प्रोक्तं मातुरस्यार्धमध्वनि। स्त्रीशूद्रादेरशक्तानां बालानां चोपनीतितः। गंधलेपक्षयकरं
शौचं कुर्यान्न संख्यया। एकैकया मृदा पादौ हस्तौ प्रक्षालयेत्ततः॥ ॥इति शौचविधिः॥ ॥अथाचमनविधिः।
तत्र पादौ हस्तौ प्रक्षाल्य यज्ञोपवीती पादौ भूमौ प्रतिष्ठाप्य निबद्धकच्छशिखः पुंडरीकाक्षमिष्टदेवं स्मृत्वा प्रह्व
तिष्ठं फेनबुद्बुदरहितं संहतांगुलिपाणिना गृहीत्वांगुष्ठकनिष्ठोत्पाशुक्नां शेषं वीक्षितं ब्रह्मतीर्थेन त्रिस्तु वी
समाहितः पिबेत्। कायेन तीर्थेन वा पिबेत्। दैवेन वा पिबेन्न पित्र्येण कदाचन। पीत्वा हस्तौ प्रक्षाल्य पुष्पावत्तः
संकोच्य संहतांगुष्ठमूलेन अलोमकेन मुखं द्विः प्रमृज्य हस्तौ प्रक्षाल्य संहतांगुलितिर्यङ्मुखं सकृदवमृज्य ह
स्तौ प्रक्षाल्य पादौ शिरश्चाभ्युक्ष्य वा संहतांगुलिभिरास्यं सलोमप्रदेशं स्पृष्ट्वा हस्तौ प्रक्षाल्यांगुष्ठप्रदेशिनीभ्यां घ्राणं ८

गुलि

का४ क्रा४

स्मृ॰ आ॰
१३

स्पृशेत्॥ अंगुष्ठानामिकाभ्यां चक्षुषी श्रोत्रं च स्पृशेत्॥ अंगुष्ठकनिष्ठिकाभ्यां नासिके हृदयं तलेन। सर्वांगुलीभिः शि
रो वा कुत्स्ले सर्वांगुल्यग्रैः स्पृशेत्॥ सर्वत्र मध्यमध्ये अपः स्पृशेत्॥ हस्ताभ्यामशक्तो त्रिः पीत्वा हस्तं प्रक्षाल्य मुखं प्रमृज्य खा
नि स्पृशेत्॥ अत्यशक्तो पीत्वा हस्तं प्रक्षाल्य श्रोत्रं स्पृशेत्॥ हृत्कंठगतालुकाभिः शुद्ध्यंति शुद्धाः क्रमाद्द्विजाः। स्त्री शूद्राद
यो तन्तः सकृत्स्पृष्टाभिः शुद्धाः॥ न वर्षधाराभिः स्वा वा मे तरीत श्रालिश्वाप्य कारणात्॥ कनिष्ठादेशिन्यंगुष्ठमूलेषु का
यपित्र्यब्राह्मतीर्थानि। करोग्रे देवतीर्थं करमध्ये सौम्यं तीर्थं अग्नितीर्थं वा निर्वपणं संस्रवणं लाजाहोममनि
त्यहोमानकायनतीर्थेन कुर्यात्॥ दैविकं च अर्चनं बलिं च उपपर्युक्षणं मार्जनं लोजनं नित्यहोमान्। दैवेन दै
विकं च। पैत्रिकं पित्र्येण। कमंडलुस्पर्शनं दधिप्राशनं। नकान्नप्राशनं स्त्रैग्रहणं दैविकं च सौम्येन कुर्यात्॥ आ
ग्नेयेन प्रतिग्रहं कुर्यात्॥ ॥अथाचमनानिमित्तानि॥ ॥उच्छिष्टस्पर्शने पादावसेचने शिखामोक्षणे यज्ञो
पवीता पदामेव उदकस्तु तीर्यवितीर्य वसंदेहेषु सर्वेषामाचामेत्॥ आस्यगतश्मश्रुस्पर्शने वा लोमकोष्ठस्पर्श
ने वैदेत्त सकृत्स्पजिह्वास्पर्शने रथ्यापसर्पणे अश्मेहपंच नखाच्छिद्रस्पर्शने वरोद नैविण्मूत्र रेतःशौचान्ते च पीत्वा

दंतगमने।

स्त्र

१३

सुरा वृ

स्वाप्य स्पृष्ट्वा

सकृन्निष्ठीव्य
वावलीदेवदत्तेदेवता।ग्निगमनेचद्विराचमेत।स्नात्वापीत्वावलीदेवनिष्ठीव्यनीष्ठीव्यसकृत्सुप्त्वाघ्रोवासोविपरि
धायवा।स्पृष्ट्वातेवहाविर्लंघणेवकृतेद्विराचामेत।।भोजनेहवनेदानेउपहारेप्रतिग्रहे।संध्यात्रयोपानेश्च
बंधेप्रश्चाद्विराचमेत।घ्राय्यायेवावस्त्रादिसहितउच्छिष्टस्पृष्टे तदालस्यांकेनिधायवातत्सहितःआचामेतः।शुश्रेत्रा
सहित
निधायवावमस्त्रवस्त्रादिकंप्रोक्षेत।अन्नपानादिहस्तउच्छिष्टस्पृष्टश्चेन्निधायाचम्यप्रोक्षेत।अन्नादिरन्नाशकौ भक्षणा
ति
उत्तदालस्यांकेनिधायवाशौचमाचमनंकुर्यात।परिवेषणंकुर्वन्नुच्छिष्टस्पृष्टोऽन्नपात्रंनिधायाचम्य अस्तु
दृष्टपरिविष्यात्।परिवेषणंकुर्वन्मूत्राद्युच्छिष्टश्चेदन्नादिकंनिधायशौचमाचमनंकृत्वाअन्नादिकंप्रोक्ष्याभि
मर्शेद्वा।संस्पृष्टपरिविष्यात्।परिवेषणेरजोदृष्टौतद्दृष्टान्नस्यपरित्यागः।अन्नाधारेचंडालस्पृष्टिकोदका
पतितादिस्पृष्टेचत्यागः।एवंरजकादिस्पृष्टेऽजलेनोक्षाप्याग्निमर्कंवास्पर्शयेत।उच्छिष्टोपहतश्रीश्च
संलापणेवास्पृश्यपदर्शनेच।पित्र्यमंत्राध्ययनेआत्मालंभेपरिधानेअधोवायुसमुत्सर्गेआक्रंदेक्रोधे
नेऽनृते।मार्जारमूषिकास्पर्शेप्रहासेष्ठीवनेऽनृते।अंत्यसंलापणेदर्शनेचकर्मकुर्वन्नाचामेत।श्वकाक

स्त्र ष

अ कर्णिका

स्मृ॰आ॰ १४

दिदर्शनेवैवैकर्मकुर्वन्नपुर्वेश्वदत्तिणंश्रवणंस्पृशेत्।अनुष्ठानेअग्निगोविप्रद्वीप्रसूतकेशनखस्पर्शनेवा
नीवीविस्रंसनेवापःस्पृशेत्।आर्द्रतृणंगोमयंवाभूमिर्वापयीर्वास्पृशेत्।स्पृष्ट्वाघ्राणिकाश्रुरक्तक्षयस्वेदस्पर्श
नेनुधन्वात्मानावादिकंस्पृशेत्।।आपस्तुनैमित्तिककर्माणिगावमनस्थानेश्रवणादिस्पर्शनेस्यान्नःशुध्यर्थं।अग्नि
स्तीर्थानिवेदाश्चवरुणार्केंदुवायवः।।विप्रस्यदक्षिणेकर्णेनित्यंतिष्ठतिपूजिताः।।जपहोमप्रदानेषुपितृदापि
डोत्कादिषु।कृतेप्याचमनंकार्यंपितृकार्येषुसर्वदा।नास्पृश्यस्पर्शनेवाचामेत्।नफलकाद्यासनासीनो
नत्रिपाद्यांनान्यार्थमासनेभोजनार्थमासनेउत्सृष्टावामेद्यान्नपदा।नान्यासनेनशयनस्थानपादुकोपानत्स्थः
नचुर्दर्शनपादाग्रस्थोनप्रह्वोनतिष्ठन्नव्रजन्नप्रणतोनान्यमनानाविलोकयन्नहसन्नरुदन्नजल्पन्नमो
नेकवद्धोनांजलिनानपरस्पृष्टजलेनवामहस्तेनवहिर्जानुकरोनप्रौढपादोनप्रसारितपादोनवद्धासनोन
गलेवद्धोनवेष्टितशिरोयज्ञोपवीतस्तृत्तरीयंवान्यथाकृत्वानाचामेत्।तत्रपुनःसम्यक्कृत्वापुनराचामेत्।
यज्ञोपवीतेनष्टेऽन्यत्स्त्रंवस्त्रंवोपवीयाचामेत्।वामहस्तेकुशेऽन्यदर्भेवास्थितेदक्षिणेननपिवेत्।अ

अ२ न४ १४

न२

यः करनखस्पृष्टानापिबेत्। तस्मात्सुरावद्दुष्टं आचमनाद्युच्छिष्टेषु पूर्वं हस्तौ वर्जयेत्। नवांगुलिभिराचामेत्। नान्तीर्थेन शब्दवत्। नाबीहितं नास्वला वं नोष्णं जलमकारणात्। वामेन पात्रमुद्धृत्य नापिबेद्दक्षिणेन तत्। सौवर्णं रूप्यताम्रेश्च वेणुबिल्वाश्म चर्मभिः। अलाबुदारुपर्णैश्च नालिकेरैः कपित्थकैः। तृणकाष्ठैर्जलाधारैरन्यैः तरितृण्मयैः। वामनोद्धृत्य वाचमेत्। अन्यदारुरसं तत्त्वेऽपि। तत्र च मृन्मयपात्रस्थं जलं नैवोपहन्यते। तीर्थतोयं च शुद्धं च करकादिस्थितं सदा। पादशौचशिखाकच्छबंधो योगोपवीतिकां। विना वान्नोऽश्रुचिर्नित्यं च द्वाःकं चैव शिरस्यपि। पवित्रकर आचामेच्छुचिः कर्माण्यमादरात्। कुशमात्रकरो वापि दर्भमात्रकरोपि वा। तदोंकारेणाचमनं यद्वा ह्यां हतितिर्भवेत्। सावित्र्या वापि कर्तव्यं यद्वा काचमिममंत्रकं। तत्काशं त्रिविधिकल्पनेन तत्पजेदन्यथा त्पजेत्। अत्पदत्तोस्तुसंत्याज्या अजेद्दूर्वादिरेखा नपादप्रक्षालनशेषमाचामेत्। यद्याचामेद्भूमौ जलं श्रीवपित्वाचामेत्। नाम्बुदकशेषेणाचमेद्भूमौ जलं श्रीवपित्वाचामेत्। नपादप्रक्षालनाचमनशेषेण नाम्बुदकशेषेण कर्माणि कुर्यात्। यदि कुर्याद्भूमौ जलं श्रीवपित्वा तत्र चांबुपात्रं स्थापयित्वोद्धृत्य कर्माणि कुर्या

घा

स्मृ॰ श्रौ॰
१५

शौ॥ ॥अथाचमनापवादः॥ ॥अग्निहोत्रेऽध्वजपे स्निग्धे वह्नेश्च लेपने। नाचामेद्भोजने दृष्टे तच्छुद्ध्यर्थं क्रतुकादि
ष्वा। अन्येष्वाचामसत्वेषु संस्कारेष्वङ्गविधिज्ञाता हलेकृत्स्ने होमेऽध्वक्लमे होतृलेपने। स्नुद्दंडे तिले हले पत्र पुष्प
फलेषु वा तथा। त्वक्तृणकाष्ठेषु नाचामेदाप्नुतस्तत्क्षणे। मधुपर्के च सोमे च प्राणाहुतिषु वा स्रुचा। आज्यहोमे
षु सर्वेषु नोच्छिष्टो भवति द्विजः। दन्तवद्दन्तलग्नं रसाज्ञाने शुद्धं जिह्वया स्पृष्टे नैव शुद्धं तत्र कर्णस्पर्शनं॥
अथवास्यागतं शुद्धं अन्यथा त्वावांतेत तत्स्थाने च्युते वै निगिरेत्प्रजन्याकर्णं स्पृशेत्। यद्वा निगीर्णे कर्णस्प
र्शात्प्रकृत्याचमनं। रसज्ञाने तु संस्कारे द्विराचमनमिष्यते। अथवास्यगतं चैव माचान्तेत्ववशिष्टकं। आ
स्यसंशोधयेद्यत्नाद्दन्तांश्च मृदुपल्लवतः। दन्तवेष्टे महत्यापरक्रमय समं विदुः। एवं ज्ञातेयच्छितेऽन्ने नरोषा
यसर्वदा। उच्छिष्टस्य मुखगतो लेपः शुद्धः प्रक्षालितच्छितः। मुखजा विप्रुषः श्लक्ष्णाः शुद्धाः स्यादाश्रपश्रुताः। छ
लाश्चाविप्रुषः शुद्धाः यद्यङ्गे न पातिताः। अंगपाते तु पतनादाचामेच्च परस्य वै। विप्रुषाचमनं कुर्याद्रनं गोपे
तितेष्वपि। वेदास्यासेतु खाजाताः शुद्धा एव तु सर्वतः। स्मश्रु वास्यगतं शुद्धं यद्यङ्गेन तु न स्पृशेत्। परैः स्पर्श

स्पा
१५
स्प

नेष्टश्चाप्युक्तश्चावामर्विंदवः। जानुमात्रे जलेतिष्ठन्नाचामेन्नैवदुष्यति। उपविष्टः समाचामेज्जानुमात्राद्बहोजले।
जलाचान्तोजलेशुद्धो बहिरावमनेवहिः। वहिरंतस्थआचांतः सर्वत्रशुचिरेवसः। जलस्थोजलेनकार्यंउच्छलच्छ
च्छलंकर्मउत्पलपोत्पलयस्थस्नुषाचान्तःशुचिर्मानुपात। नजलेशुष्कवस्त्रेणनस्नुषेचाईवासमा। आचाम २७ ले
दिक्रियांकुर्यान्नेवहिर्जानुकत्वचित्॥ ॥इत्याचमनविधिः॥ ॥अथदंतधावनविधिः॥ ॥प्रातरुत्थायचक्षुर्व्य
र्थंकर्तव्यंदंतधावनं। प्राङ्मुखस्येशानुमुखोवादक्षिणांवाङ्मुखस्तुत्पातर्जानुकरउपविश्यपतितान्कषाय
कटुकसुगंधिकंटकिक्षीरवृक्षगुल्मलतादीनामेकेनप्रक्षालितेनवाग्यतोदन्तान्धावयेत्। तत्रवृक्षजकाष्ठ
स्यादव्रणंऋजुकीटाद्यदूषितं। द्वादशांगुलमष्टांगुलंवाकनिष्ठिकाग्रसमस्थूलंपर्वार्धकृतकूर्चकंदंत
धावनमुद्दिष्टंजिह्वालेखनिकातथा। दशांगुलांगुलकासा। स्त्रीणांचतुरंगुलंसर्वेषांवैके॥ आयुर्बलं
यशोवर्चःप्रजापशुवसूनिचाब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते॥ ॥इतिदंतधावनमंत्रः॥ ॥प्रक्षाल्य
तस्मात्त्यजेत्। तत्रखदिरगौरीकात कंकरवीरकुब्जासनार्कसर्जानिम्बेदापामार्गमालतीबिल्वाम्रक

करंजवैकं१ दि३

31

दंवकारंजवंजीवेणुलज्ञमाषकवदरशिरीषकोविदारपलाशशाकवृक्षशिखंडीप्रियंगुतमाला॥ऽशुभा॥

शाल्मल्यरिष्टश्लेष्मांकिंशुकपीलुविभीतकगुग्गुलुकच्छुकाक्षतिंदुकवंधूकाः अंगुलयश्चरूपाणि स्वाङ्गुलिका

श्चवर्ज्याः॥ इष्टकालोष्टपाषाणैर्न कुर्याद्दंतधावनं॥ दधित्थनीलीचवामोचाकदंवेगुदतिंदुकाः॥ वंधूकमल्लि

(ट्कपोरक) काराजजलकार्प्पासश्रीहराः॥ न यात्रोडुंबरवटकुटकशिंशिपाशिग्रुमिक्षुशाकाशेद्रंत्रधुद्रोणपर्ण (स्यह)

न्नान्यथाशुचिः॥ कोविदारशमीकाचश्लेष्मातकफलाशकाः॥ निर्गुंडीशिंशिपाशारवांकदंववैकुटजाव (शाक)

टाः॥ विहिताः प्रतिषिद्धाः स्मृतिमेतस्माद्विकल्पिताः॥ पालाशं कुसुमं काशं शिंशिपां कार्प्पासंदमयंत्रीशाल्मली

शिरीषसैमीलक्ष्मणाः॥ करंजं वटार्कवकुलपारिजातनिर्गुंडीहरवीत्रखं कदंकिनश्चशूतिंगोयोग्रगंधि

मधुरं विदलं विल्वं चं विषदग्धं हर्तुशुष्कं चवर्जयेदित्येके॥ श्रीगिने शयने याने पादुके दंतधावनं॥ पालाश

श्चात्यकौवर्ज्यौ सर्वकुत्सितकर्मसु॥ श्राद्धेयज्ञेव नियमे पत्यौ चप्रोषितेतथा॥ अजीर्णेचविवाहेचतु

एवासे व्रतेषुच॥ प्रतिपद्दर्शषष्ठीषु नवम्यां च विशेषतः॥ दंतकाष्ठं वर्ज्यं॥ अष्टम्यां चव इर्ईश्यां॥ एभिस्यां (१६)

श्रीतिलदंतकाष्टानि वर्ज्यानि॥ अर्कवारे व्यतीपाते जन्मदिनसंक्रांतिनंदासु विशेषतः॥ षष्ठीप्रतिपदोश्चाअ
ष्टमीपर्वसु विशेषतो दर्शे नवम्यां च॥ तैलाभ्यंगं स्त्रियं मांसं दंतकाष्टं च वर्जयेत्॥ दंतकाष्टालाभे प्रतिषिद्धदि
ने नैव॥ अपां द्वादशगंडूषैर्मुखशुद्धिः॥ यद्वा तृणपर्णोदकेनांगुल्या वा दंतान्धावयेत्प्रदेशिनीं वर्ज्य मध्यमा
नामिकांगुष्ठैर्दंतघर्षणं न वत्पापि॥ ॥इति दंतधावनविधिः॥ ॥अथ स्नानविधिः॥ ॥संशोधितदंतानाचा
मेद्विधिवत्स्नानमाचरेत्॥ स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणां॥ अस्नातस्याफलं कर्म जपहो
मादिकर्मसु॥ गुणा दश स्नानपरस्य पुंसो रूपं च तेजश्च बलं च शौर्यं॥ आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्नघा
तश्च तपश्च मेधा॥ स्नानेनात्मप्रसादः स्याद्देवा अभितिष्ठंति सदा॥ सौभाग्यं श्रीः सुखं पुष्टिः पुण्यं विद्या यशो
धृतिः॥ महापापहरं नित्यं अलक्ष्मीनाशनं तथा॥ शोकदुःखादिहरणं प्रातःस्नानं विशेषतः॥ दुःस्वप्नस्फोटनं
स्नानं दुर्विचिंतानिवारणं॥ ततःकालस्य नित्यं च न करोति विचक्षणः॥ प्रातर्मध्याह्नयोः स्नानं वानप्रस्थ
गृहस्थयोः॥ यतेस्त्रिषवणं स्नानं सकृत्तु ब्रह्मचारिणः॥ सर्वे वापि सकृत्कुर्युरशक्तौ वोदकं विना॥ स्नानं च सर्व

स्म॰ त्रा॰
१७
धर्म

वर्णानां कार्यं शौचपुरःसरं। समंत्रकं द्विजानां स्यात् स्त्रीशूद्राणाममंत्रकं। नमस्कारेण मंत्रेण शूद्राणां च क्रि-
याः सदा। न जले शुष्कवल्कले शुष्के चैवार्द्रवाससा। तर्पणाचमनं जाप्यं मार्जनं नमस्त्रयं त्वेद्वैदिकमाचरेत्॥ ब्राह्मस्ना-
ने च सूर्यार्द्धे जपोत्सर्जनतर्पणे। जले स्थितो होमं शुष्केणा जले कुर्वन्नश्यति। स्नानं च विविधं प्रोक्तं वारुणेन
रक्षेदत्ता। तत्रापि वारुणं मुख्यमितरे गौणमेव तत्। आग्नेयं वारुणं ब्राह्म्यं वायव्यं दिव्यमेव च। सारस्वतमिति
स्नानं स्मृतं षोढैव तत्त्ववत्। आग्नेयं भस्मना स्नानं मज्जनं वारुणं स्मृतं। आपोहिष्ठामयं ब्राह्म्यं मंत्रस्नानं च
तत्स्मृतं। पश्चाद्ईशं कुशाग्रैश्च मार्जनं तन्मयं तत्। वै ब्राह्म्यमहमस्तु तं तोयं शिरसा धारयेदिति। यत्स्मृतं
तदपि ब्राह्मं वायव्यं रजसा गवां। दिव्यमातपवर्षाभिर्गंगास्नानसमं स्मृतं। विद्वत्सरस्वती वाचा प्राप्तं सार-
स्वतं स्मृतं। दिव्यतीर्थे तु वै स्नानं गुर्वाचार्यैरितं तथा। सर्वतीर्थाभिषेकाच्च पवित्रा विदुषां हि वाक्। श्वचंडाला-
दिस्पर्शने तु कार्यं वारुणमेव तु। काम्यं मलापकर्षं च क्रिया स्नानं च वारुणं। इतराणि यथा योग्यं देश-
कालाद्यपेक्षया। स्रोतसोभिमुखः स्नायात् मार्जनं चाघमर्षणं। अन्यत्रार्कमुखो रात्रौ प्राङ्मुखो भिमु-

८

खोपिवा।संध्या ऽस्वक्रसंध्यायांतथावाद्यंतयाममो।।नित्यंनैमित्तिकंकाम्यंक्रियांगंमलकर्षणं।।क्रियास्नानंतथा
षष्टंषोढस्नानंप्रकीर्तितं।।नित्यमेवउमध्याह्नेप्रातःक्वचनकस्यचित्।पतिव्रतिब्रह्मचारिहोत्राग्नोत्तयच्छिनं।
उच्छिष्टाद्युपयातेषुचास्पृश्यस्पर्शनेषुवा।ग्रहणेसंक्रमादौचस्नानंनैमित्तिकंस्मृतं।।ज्ञाप्यस्नानादिवंकाम्यंदे
वज्ञाविधिनोदितं।।दृष्टापूर्तक्रियार्थंचयत्क्रियांगंस्नानमुच्यते।मलापकर्षणायत्तस्नानमभ्यंगपूर्वकं।स्नान
मेवफलंतीर्थक्रियास्नानंतदुच्यते।स्नानार्हस्त्वगात्रैवस्त्राच्छस्नानमाचरेत्।प्रक्षाल्योच्छिष्टमुच्छिष्टम
थैवस्नानमाचरेत्।नाल्पांसांसिशिरोमज्जेन्नानगाहेसमुद्रके।क्रियास्नानेशिरोमज्जेदथ्यत्रापिसरित्सुतु।
उद्धृत्याद्धर्वस्त्वंवास्नानंस्यात्संगवेपिवा।प्रातःसंक्षेपतःस्नानेहामाद्यर्धनदिष्यते।नदीसरित्स्वखातगर्त्तप्र
स्रवेषुवा।सरस्सुवाह्नात्रिमेषुशस्तंतीर्थेविशेषतः।।वाप्यांकूपेतडागेवापारक्येचोद्धृतवारिणि।प्रातःस्नानं
सदाकुर्यादुष्णेनैसदानुदातत्रपादौमुखंचप्रक्षाल्यप्रणवंसावित्रींचस्मृत्वाशिखांबद्ध्वावम्य...प्रक्षा
ल्यदर्भादीविधायदर्भपाणिर्जलेनत्वाप्रततांजलिः।प्राङ्मुखोवगाह्यकटिकण्ठादीनिष्टजस्नात्वादि

कृतरंकला

१८

ग्राचम्य दर्भपाणिरापोहिष्ठाद्येरष्टैवतैर्मार्जनं कृत्वा जलालोडनं चाघमर्षणं कुर्यान्नवाप्नुनः स्नात्वाद्वि
राचम्य जलतर्पणं कार्यं न वा ततो वस्त्रं घातं निःपीड्यापःस्थरूपा वस्त्रद्वयं परिधानोत्तरीयं कृत्वा स्नानवस्त्रं
निःपीड्यानमस्संध्यामुपासीत॥ ॥मध्याह्नस्नाने त्वयं विशेषः॥ कार्यं मध्याह्निकं स्नानं संहितैवं विस्तृतं॥ सं
क्षिप्तस्य प्रयोगोत्र च कृतस्मृतिसंग्रहात्॥ तत्र च कृतशौचो द्विराचम्य विष्णुशिवं सूर्यं चेष्टदेवं नत्वा प्रक्षालि
ते तटे स्थित्वा मृत्तिकां दर्भान् दत्तां स्वडुला चश्वत्थकंठछाप्य मृत्तिकां त्रिधा विभज्य लायेनैकेन नाले रचः संलि
प्य प्रक्षाल्य स्नात्वा द्विराचम्य भूर्भुवः स्वरिति मृत्तिकां प्रोक्ष्य हस्ता संतत्सवितुर्वरेण्यमिति सूर्याय दर्शयि
त्वा नाले रक्षस्योना पृथिवीत्येति वा पृथिवी शांतेति वालिप्या चलागंस्यर्यस्पर्शितं नाले तृणं गौधद्वारेत्या
लिप्य आपोस्मान्मातरः इदमापः प्रवहत सुमित्रियान आपः इति शिरस्यप्सु [illegible] त्रिः [illegible] संस्वितिच
हिः प्रसिव्य पोस्माद्वेष्टियं च वयं द्विष्म इति मृशेषं प्रक्षाल्यान्यतीर्थे गंगादितीर्थं स्मृत्वा नत्वा हिरण्यशृंगमि
ति वरुणं नत्वा तीर्थं चतुर्हस्तं प्रकल्प्य प्रदक्षिणमुदकमावर्तयेत्॥ जानुमात्रात्परे जले तिष्ठेदमात्रोपविशे

१८

स्नात्वा देहं प्रक्षाल्य पुनः स्नात्वा बहिराचम्याद्दैवतैर्व्वारुणैः शुद्धैः शुभ्रैर्विप्रपवित्रलिंगैर्म्मार्जनं कृत्वा ॥ अस्मेतं गोश्रि
जलं त्रिंशलो ह्यनिमग्नो ह्यघमर्षणं कुर्यात् ॥ तत्राघमर्षणमंगुष्ठांगुलिभिः श्रोत्रदृग्नासिकामुखं पिधाय निमग्नस्त्रिः प
ठेद्दशद्वादश वा वर्त्तयेदघमर्षणं ॥ ऋतं चेति त्र्यृचं सकृद्धु पदां वा जपेद्वा ओंकारं वा जपेद्विष्णुं शिवं सूर्यं स्मरेत् ध्यात
त त्रिः पंचसप्तदशद्वादशवारं वा स्तुत्य बहिराचम्य जलमध्य एव ईश्वासा जलतर्प्पणं कुर्यात् ॥ ततो जलादुत्तीर्य
स्नानवस्त्रं च तं तटे निःपीडयेत् ॥ येषां स्माकं कुले जाता इति ॥ ततः स्नानाईवस्त्रं त्यक्त्वा शुक्लं शुद्धमहतं कार्प्पा
सं क्षौमं वा अथवा धौतं रक्तं वा वस्त्रद्वयं हृत्वा जंघे पादौ प्रक्षाल्य बहिराचम्य गंगादिस्थानिक यो ईदृशं कुर्यात् ॥ अ
थ नित्य ब्रह्मयज्ञतर्प्पणादिकं कुर्यात् ॥ ॥ अथ तर्प्पणविधिः ॥ ॥ प्रयत्ना ह्यनेन सव्येन दक्षिणेन तु पाणिना ॥
सव्योत्तरस्यां पाणित्वा मथवा नर्प्पणं चरेत् ॥ श्राद्धे पिंडे विवाहे च दाते चैकेन दीयते ॥ तर्प्पणे तूभयेनैव जलं
देयं तु नान्यथा ॥ वामहस्ते तिलान् हित्वा जलमध्ये तु तर्प्पयेत् ॥ स्थले शाद्वले वापि रोमरूपेन कामचित् ॥ अ
संस्कृतप्रमीतानां स्थले दद्याज्जलांजलिं ॥ शुक्लैः शुद्धैर्देवानुपवीती देवतीर्थेन प्राङ्मुख ऋषीं तर्प्पयेत् ॥ शावलेन तिले

स्मं॰ आ॰
१९

ऋषीन्निवीतीकायेनोदङ्मुखस्तर्प्पयेत्॥ आचार्यान्पितॄन्प्राचीनावीतीपित्र्येणकक्षैस्तिलैर्दक्षिणामुखस्तर्प्प
येत्॥ यद्वा शुद्धोदकैर्देवानृषींश्च पितॄंस्तिलैः सर्वान्वा सर्वैस्तर्प्पयेत्॥ यद्वा देवानक्षतैस्तंडुलैः ऋषींस्तिलैः
पितॄंश्च॥ देवानामेकैकमंजलिं दद्यात्॥ ऋषीणां द्वौ द्वौ॥ पितॄणां त्रीं त्रीं दद्यात्॥ यद्वा वारत्रयं सर्वेभ्यः॥ य
द्वा ब्रह्मादयो ये देवास्तान्देवांस्तर्प्पयामि॥ भूर्देवांस्तर्पयामि॥ भुवर्देवांस्तर्पयामि॥ स्वर्देवांस्तर्पयामि॥ भूर्भुवःस्व
र्देवांस्तर्प्पयामि॥ कृष्णद्वैपायनादीनृषींस्तर्प्पयामि॥ भूर्ऋषींस्तर्प्पयामि॥ भुवर्ऋषींस्तर्प्पयामि॥ स्वर्ऋ
षींस्तर्प्पयामि॥ भूर्भुवःस्वर्ऋषींस्तर्प्पयामि॥ सोमः पितृमान्यमोंगिरस्वानग्निष्वात्ताग्निकाव्यवा
हनादयो ये पितरस्तान्पितॄंस्तर्प्पयामि॥ भूः पितॄंस्तर्प्पयामि॥ भुवः पितॄंस्तर्प्पयामि॥ स्वः पितॄंस्तर्प्पयामि॥
भूर्भुवःस्वः पितॄंस्तर्प्पयामि॥ ततः पित्रादीन्प्रतिगृरूपं तर्प्पयेत्॥ मात्रादीन्मातामहादीन्मातामह्यादीर
पितृव्यांस्तत्पत्नीः ज्येष्ठभ्रातॄंस्तत्पत्नीः॥ गुर्वाचार्योपाध्यायांश्च सुहृत्संबंधिबांधवांश्च दृष्ट्वा मदादृष्टपोष
कान्कनिष्ठांश्च तत्पत्नीश्च तर्प्पयेत्॥ तिलालाभे स्वर्णरूप्यताम्रदर्भतुंडुतोदकैः॥ पद्ममौक्तिकहस्तेन कार्यं

१९

वा पितृतर्प्पणं। न केवलं जलेनैव कर्त्तव्यं सति संभवे। न जीवपितृकः कृष्णैस्तिलैस्तर्प्पणमाचरेत्॥ सप्तम्यां रविवारे च जन्मर्क्षे दिवसेषु च। गृहे निषिद्धं सति तिलैस्तर्प्पणं तद्बहिस्तथा भवेत्॥ शोभनस्य गृहे शोभनदिने न तिलतर्प्पणं॥ विवाहे चोपनयने चौले सति यथाक्रमं। वर्षमर्द्धं तदर्द्धं वा नैव कुर्यात्तिलतर्प्पणं॥ कृष्णे सत्यां च तन्मासे नैव कुर्यात्तिलतर्प्पणं। तिथितीर्थविशेषेषु कार्यं प्रेतेषु सर्वदा॥ पिंडान् सपिंडान् नोदद्युः प्रेतपिंडं विना क्वचित्॥ पितृयज्ञे च यज्ञे च गयायां यादवेश्वर रेवत्यां॥ गयासाम्यं समंतात् हस्तकोविदा॥ कुशाग्रेण गाः॥ वसुरुद्रादित्यरूपाः श्राद्धार्थं तर्प्पयेत् पितॄन्॥ नामगोत्रे समुच्चार्य तिलैः तीर्थेषु संयतः॥ दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्प्पणं॥ कृष्णांगारचतुर्दश्यामपि कार्यं सदैव च॥ ॥यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः॥ चतुर्दशैते मंत्राः स्युः प्रत्येकं च नमोन्विताः॥ एकैकेन तिलैर्मिश्रान् दद्यात्त्रींस्त्रीन् उदकांजलीन्॥ यज्ञोपवीतिना कार्यं प्राचीनावीतिना यथा। देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता॥ ततः स्नानवस्त्रं निःपी

स्मृ० आ०
२०
२१।४

डयेतां न चित्रगणीकृतं पीडयेत् । न जले पीडयेत् । न दक्षिणाग्रं प्रसारयेत् । स्नात्वार्द्रवस्त्रो विण्मूत्रे कृत्वाया
मत्रयं कृत्वा पुनः स्नायात् । नोत्तरीयमधः कुर्यान्नोपर्यधः स्वमंबरं । न सर्वं रक्तं कृष्णं वा परिदध्यात् । क
दाचनाकृतपंशाणमजिनं योगपट्टोत्तरीयकौ यज्ञोपवीतमन्यद्वा द्वितीयं तत्सर्वे द्विहा । स्नात्वा न पीडये
त्केशौ नांगे स्वस्त्रोयमुद्धरेत् ॥ ॥ न वस्त्रं निधुनेच्छस्त्रं न केशमवस्त्रं न धयेत् । स्नातो नांगानि प्रज्याद्वस्त्रान वस्त्रे
ण सर्वथा । नान्योन्यं स्पृष्टनोत्सृज्यात्रलिप्येत्स्पृष्टतो निश्चाः स्नात्वा न धावयेद्दंतान्नोत्सृज्याद्य सस्मामुखं
न रात्रौ मृत्तिकास्नानं नैव लोमानि वापयेत् ॥ संध्ययोर्नैव गोमूत्रं न खुदं गोमयं निशि ॥ दिवा तु गोश
कृन्मूत्रे वैश्यादिर्निशीथं तु तस्मात् ॥ पंचपिंडाननुद्धृत्य न स्नायात्परवारिषु स्नायाद्देवखातपहते नित्यार्थेन
महानिशि । महानिशा द्वे घटिके रात्रौ मध्यमयामयोः ॥ न महानिशि नित्यार्थकाम्यं नैमित्तिकं त्ववेत् ।
स्नायात् उष्णमस्नातो निष्णुष्ले न जलेन वा । अस्पृश्यस्पर्शने स्नानं निष्णुष्णेन जलेन ॥ नाचुहन्या
न्नानिंदेन्नतीर्थे तीर्थांतरं स्मरेत् । न स्नायादुत्सवे तीते मंगलं प्रविनिवर्त्य च । अनुव्रजप सुहृदं न्नतर्वं

४०

यित्वेष्टदेवतां॥ स्तेतुजन्मदिवसे प्रतिपन्नवमीषु च॥ श्राद्धकर्त्ता वान्यदिने संक्रांतिग्रहणेषु च॥ जातेर्द्धव
रे सप्तम्यां चतुर्दश्यष्टमीषु च॥ एकादश्यां पौर्णमास्यां षष्ठ्यां दर्शे विशेषतः॥ तैलाभ्यंगं रतिं मांसं दंतकाष्ठं
च वर्जयेत्॥ कोष्णोदकेन न स्नायाद्यद्यदापि कारणात् क्रियास्नाने च काम्ये च पारक्ये च वर्जयेत्॥
नद्यायां नास्नामित्ते स्नायाद्विशेषात्तमध्यमाघघो॥ अग्निप्रज्वालवाप्स्नायाद्वाप्यादिषु महाजले॥ राज्ञ द
र्शनसंक्रांतिविवाहोत्क्रांतिवृद्धिषु॥ स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च॥ नद्यां स्नात्वा नदीं
चान्यां न प्रशंसेद्बुधधर्मवित्॥ अस्पृश्यस्पर्शनस्नाने नाघमर्षणतर्पणे॥ क्लावष्पस्तुवीस्यातां दं
पतीशयनं गतौ॥ शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान्॥ स्नातोन्नमेथुने स्नायाज्ज र्द्धधारणसं
कया॥ अशौचे तदशावावशौचं मूत्रपुरीषवत्॥ रोगेणायदज्ञस्त्रीणां न तेनाशुचयः स्मृताः॥ चंडालादि
स्पर्शनादौ विस्तारो वहस्पतेः पृथक् शवानुगमनस्नाने घृतप्राशो विकल्पितः॥ यत्र शंसः सचैलं स्यात्स्ना
नं तत्र सुवासिनी॥ ॥ कुर्वीत वा शिरः स्नानं शिरोरोगी जटी सदा॥ अशक्तो शोलन गृहे शोसनाद्विच

स्म॰ आ॰
२१

सर्वथा॥ नशीतलजलस्नानं कार्यं विवेकेण सेविना॥ उष्णस्य जलस्नानं मार्जनं वैव कारयेत॥ अद्य प्रर्षण जपो
ह्निन वा॥ जलतर्पणं च कार्यं न वा॥ स्थलतर्पणं तु पात्रस्थे जले अक्षतादीन् हित्वा पात्रान्तरे कार्या सोदके
गवा नैवास्य वर्हिषि स्थले वा कार्यं नावर्हिषि॥ ॥अथ अभ्यंगस्नानविधिः॥ ॥तैलाभ्यंगे निषिद्धास्तु
सर्वाश्च तिथयः सदा॥ द्वितीयां वर्जयित्वैव दृष्टादृष्टविशेषतः॥ सार्षपं गंधतैलं च यत्तैलं पुष्पवासि
तं॥ अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन॥ तैलाभ्यंगनिषेधेऽत्र तिलतैलं निषिध्यते॥ अभ्यंगस्य निषे
धस्तु सार्षपादे स्त्रीष्यते॥ स्नेहेनाभ्यंगो भवति स स्नेहः सार्षपादिकः॥ भोजनादौ तैलस्य निषेधोऽल्पग
एव सः॥ तैलशब्दः तिलस्नेहे रूढो नैव यौगिकः॥ अतस्तिलविकारेऽपि पिण्याकतिलमोदके॥ शष्कुली
कृशरादौ वा निषेधो नैव जायते॥ सार्षपादौ तैलशब्दस्य लक्षणया सदृशत्वतः॥ संतापः कांतिरल्पायुर्दुःखं
निर्धनता भवेत्॥ अनारोग्यं सर्वकामाः वारेष्वभ्यंगकारिणां॥ असौ सा गंध वैधव्यं वा रणो गुरुश्च क
योः॥ निषिद्धदिवसे वा रात्रौ व व्याधितस्य वा ह्यातरस्तु तैलं न दुष्यति कदाचन॥ शिरःस्नातस्तु तै

२१

लेननांगंकिंचिदुपस्पृशेत्।सर्वथानित्यकामार्थंस्नायादेवकथंचन।विनामृत्तिकयावापिमलकृष्टेनसं
युत॥ ॥इतिअस्पृश्यस्नानविधिः॥ ॥अथसंध्याविधिः॥ ॥संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसुयत्
किंचित्कुरुतेकर्म्मनतस्यफलमश्नुते।तत्रपादौहस्तौप्रक्षाल्यद्विराचम्यदर्भपाणिरापोहिष्ठाद्यैर्मंत्रैर्द
र्भैःशिरसिमार्जनंकृत्वात्मानंपरिषिच्यसूर्यश्चेत्यपःपीत्वाद्विराचामेत्।सायंकालेत्वग्निश्चेत्यपःपि
बेत्।ततोद्विराचम्यपुनश्चाब्दैवतैर्मार्जनंकृत्वात्मानंपरिषिच्यगायत्र्याभिमंत्रितंतोयमंजलिं।सूर्या
यार्घ्यंत्रिःक्षिपेत्।अशुद्धदेशेधारांबुमार्जनंपरिवर्जयेत्।पात्रस्थेनांबुनाकार्यंवामहस्तस्थितेनवा।ततः
प्राणायामत्रयंकृत्वाआसूर्यदर्शनात्तिष्ठन्प्राङ्मुखोगायत्रींजपेत्।आनक्षत्रदर्शनादासीनःसायंप्रत्यङ्मुखो
जपेत्।ब्रह्मचारीगृहस्थश्चशतमष्टोत्तरंजपेत्।वानप्रस्थोयतिश्चैवसहस्रादधिकंजपेत्।यद्वापसुजपेदे
वीमष्टाविंशतिमथवादशसदर्भपाणिना।होमानंदर्भस्त्रकसंख्यया।हस्तेनावर्तयेद्देवीमनन्यस्थेनतथापिवा।
सोवर्णराजतेस्ताम्रेस्फाटिकेरत्नजैस्तथा।आरिष्टैःपुत्रजीवोत्थैरिन्द्राक्षैःशंखसंभवैः।रुद्राक्षैरपिपद्माक्षैःकु

43

स्म॰श्रा

२२

शय्यंथिभिरेववामालिलिखितव्यंस्यात्दष्टशतसंख्यया।वक्त्रःपंचाशतावापिसप्तविंशतिभिस्तुवा।औष्ठ्या
जपादुपांशुःस्यात्श्रेष्ठोवैमानसस्मृतः।सउपांशुजपोशस्फुलजिह्वारदच्छदः।मानसस्त्वचलजिह्वारशनच्छ
दैरितः।नाधोरविर्निन्यमनानवतास्रपत्करः।जपेनप्रौढपादःसन्नावष्टब्धोलसोशुचिः।नचक्रामन्नजल्पं
श्चनपार्श्वमवलोकयन्।नासंख्यातमदर्भश्चनाशिखाकच्छबंधनः।मनःसंहरणंसौचंमौनंमंत्रार्थचिंतनं।
अव्यग्रत्वमनिर्वेदोजपसंपत्तिहेतवः।जपान्तेप्रातःसंध्यैःसौरैःसूर्यमुपतिष्ठेत्।सायंवारुणैः।यमालप
चजातवेदसेनवैश्वदेवैः।रौद्रैर्वोपतिष्ठेत्।दिग्भ्योदेवताभ्योनमस्कृत्यसंध्यायैसावित्र्यैगायत्र्यैसरस्वत्यै
सर्वाभ्योदेवताभ्योनमस्कुर्यात्।। ।।इत्यादिविधिंस्वाचारंकार्यंपुनःसूर्यंनमस्कृत्यनामगोत्रेणवाग्यतः।
गृहमग्न्यंतुनीत्वाथहोमंकुर्याद्यथाविधिः।। ।।इतिसंध्योपासनविधिः।। ।।अथहोमविधिः।। ।।होमेतु
स्वयंयजमानःपत्नीपुत्रश्चकन्यका।ऋत्विक्शिष्योगुरुर्भ्राताभागिनेयःसुतापतिः।एतैरेवहुतंयत्तुतद्धुतं
स्वयमेवतु।पर्वहनवर्जंपत्नीजुहुयात्।कुमारीवा।असमर्थेदंपत्योर्होतव्यंतत्र्विगादिना।द्वयोरप्यसन्निधे

२२

तद्वेहुतमनर्थकं।सन्निधौयजमानःस्यादुद्देशत्यागकारकः।असंन्निधौतुपत्नीस्यादुद्देशत्यागकारिका।असन्निधौ
तुपत्न्यास्यादध्वर्युस्तदनुज्ञया।तस्मादेवसदैवास्नेहंकुर्वीतानुज्ञयाविना।नोपवासीप्रवासेस्यात्पत्नीधारयतेव्रतं।सर्व
दायजमानोवात्यजेत्तद्दिक्षुखःशुचिः।प्रातर्होमेसंगवांतःकालस्तूदितेयथा।सायमस्तमितेहोमकालस्तुनव
नाडिकाः।वक्तुस्थक्षेंधनेचाग्नौसुसमिद्धेविधूमिके।सांगारेलेलिहानेचहोतव्यंनान्यथाक्वचित्।अग्निःस्वदक्षिण
हस्तेनकर्मदक्षस्यलावहः।अग्निंपरिसमूह्याथपरिस्तृत्यपर्युक्ष्यततोगंधपुष्पैरलंकृत्यसमिधंत्रिःप्रदीप्यास
मिधंचयुगलमतिक्रम्यदेवायतनेसंस्तीर्णहोमंदेवतीर्थेनकायेनसोमेनवाहुत्वापुनःसमिधंत्रिःप्रोक्षाप्रक्षाप्य प
रिसमूह्यपर्युक्ष्यहुतशेषंब्राह्मणायदत्वानमेत्।पयोदधियवागूश्चसर्पिरोदनतंडुलाः॥सोमोमांसंतैलमा
पोदशैतान्यग्निहोत्रके।स्यादग्निहोत्रवत्स्थालीसंस्कारोमंत्रवर्जितः।यज्ञात्रिप्रोक्तानितेषांमांससमोपासनेनच
शालिःश्यामाकामनीवारव्रीहिगोधूमयावकाः।एतेषांतंडुलाहोम्यायावन्नालाप्रियंगवः॥प्रियंगवःश्यामाकवश्च
गोधूमाव्रीहयोयवाः॥अरूपेणापिहोमास्युःस्वरूपेणैववैतिलाः॥द्रवद्रव्येणहोतव्यंपाणिनाकठिनंहविः॥

व्रीहीणां वा यवानां वा शतमाकृतिरिष्यते। तदर्द्धं द्विगुणं ग्रासो मसूरं गंडाकृतिस्तथा। कुक्कुटांडकमात्रं वा पिंडस्तप
सिधीयते। अंगुष्ठपर्वमात्रं स्यादवदानं ततोपि वा। ज्पाय विष्टहादाजं तु चतुरंगुलसम्मितं। ग्रासमात्रं तु वेद्धित्ता
अग्रं ग्रासचतुष्टयं। अग्रं चतुर्गुणं ह्रासमहंतकारमुच्यते। तिलाज्यफलमग्रं वा पूर्वपूर्वं चतुर्गुणं। तूलोजनं
तद्द्विगुणं शाराकःपात्रमेव वा। यद्वा। प्रक्षेप्तुं धान्यं च तत् अष्टेराकृतिपरिकीर्तितं। तिलानां तु तदर्द्धं स्यात् तदर्द्धं स्यात् स्वत
स्पष्टं। पालाशखादिराश्वत्थशम्युदुंबरसम्मिताः। अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः। सत्वचः समि
धः कार्या ऋज्व्यश्लक्ष्णाः समास्तथा। शस्ता दशांगुलाः स्थूला दशांगुलकास्तथा। आर्द्रपक्काः समच्छेदाः तर्जन्यं
गुलिवर्त्तुलाः। अपाटिताश्च द्विशाखाः कृमिदोषविवर्जिताः॥ दग्धाः कृशास्तथा स्थूलाद्र्या दीर्घाश्च वर्जयेत्। यद्वा। स
मित्पवित्रं वेदश्च त्रयः प्रादेशसम्मिताः॥ स्रुक् स्रुवाद्विगुणः कार्यः त्रिगुणः परिधिः स्मृतः। स्मार्ते प्रादेश इध्मो वा द्विगुणः।
परिधिः स्मृतः॥ ॥इति होमविधिः॥ ॥अथ दर्भविधिः॥ कुशाः काशा यवा दूर्वाः उशीराश्च कुंदुराः। गोधूमा व्रीहयो मुं
जा दश दर्भाश्च बल्वजाः। नलो मासस्य दर्शे तु ग्राह्या दर्भाः समाहरेत्। अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनः। वि

गिविनासहोत्पन्नपरमेष्ठिनिसर्गज। नुदपापानिसर्वाणिममस्वस्तिकरोभव॥ कुशदर्भोत्पाटनमंत्रः॥ एतन्मंत्रंसमुच्चार्य
ततःपूर्वोत्तरामुखः। हुंफट्कारेणमंत्रेणसकृच्छित्वासमुद्धरेत्। अच्छिन्नाग्राअशुष्काग्राःपित्र्येतुहरिताःशुभाः॥
अमूलादेवकार्येषुप्रयोज्याश्चजपादिषु। समग्रपत्राःकुशाःशस्तादेवेपित्र्येचकर्माणि। अनंतस्तरुणौसाग्रौद्वौ
देशौतुपवित्रकौ। नऊर्ध्वंदर्भपिंजूलैर्याब्रह्मणस्यपवित्रकं। एकैकंस्नानमुद्दिष्टंवर्णेवर्णेयथाक्रमं। सर्वेषांवा
भवेद्वाभ्यांपवित्रंग्रंथितंनवा॥ त्रिभिस्तुशांतिकेकार्येपौष्टिकेपंचभिस्तथा। चतुर्भिश्चाभिचारेस्यान्निष्कामैरि
तिकेचन। सपवित्रःसदर्भोवाकर्मांगाचमनंचरेत्। नोच्छिष्टंतद्भवेत्तस्यभुक्तोच्छिष्टंतुवर्जयेत्। यैःकृताःपिंडनि
र्वपःश्राद्धंवापितृतर्पणं॥ विण्मूत्रादिषुपंचसुस्नानेष्वात्यागोविधीयते। नीवीमध्येस्थिताह्याजपायज्ञश्चमौछि
तास्तथा। वामहस्तस्थितैर्दर्भैर्नापिदक्षिणेनतु। आवद्धाग्निनोपग्रहणेनदोषःपिबतोलेवत्ता। नबद्धग्रंथिनाचामे
नहूर्वीतिःकदाचन। स्नानेदानेजपेहोमेस्वाध्यायेपितृतर्पणे। सपवित्रौसदर्भौवाकरौकुर्वीतनान्यथा॥
कुशालाभेतुकाशाःस्युःकाशाःकुशसमाःस्मृताः॥ कुशालाभेगृहीतव्याअर्थेदर्भद्वयोचितं। नाईछेनीयाश्चौ

स्मृ॰आ॰

उलुनीयाद्वारसंभयोः दर्भालावेष्वर्णाद्विष्णताश्चैवशनैः क्रियाश्चरेत्॥ ॥इति दर्भविधिः॥ ॥ बर्हिः कुशामयं ग्राह्यं
नलत्पन्नेकुशाः यदि। शसेर्यर्क्षतवञ्चवालमौंजाजलेद्भवाः। सुगंधितेजनादारदूर्वाव्रीहरुमा अपि। यद्वा सर्वत्र
तोऽस्यापि ग्राह्यं बर्हिर्यथेप्सितं। सुकष्टं ठकमस्थलडुगंधितृणवर्जितं। मूलकानेरकांश्चापि वर्जयेत्परे
वुधाः कुशाभावे परे प्राक् सर्वबलसदोषधीः। वंशकस्वकरेषु च परिव्याधकवर्जिताः। मुख्या दर्भविशे
षेण्यकेचित्काशान् कुशाश्च शरान्तरा। बल्वजांपुंडरीकानि यवव्रीहितृणानपि॥ ॥इति बर्हिः॥ ॥ पालाशः खा
दिरो वेध्मो मुख्यास्यान्नदलासतः। शमीवटोडुंबरजाश्वत्थास्वदलासतः। वनस्पतीनां सर्वेषां इध्माः का
र्याविशेषतः। तत्रैतात्वर्जयेद्वृक्षान् कोविदारविलीतकौ कापित्थामलकैराजवृक्षं शाकटुमं तथा॥ नीपं
निंबकरंजवातिलकं शाल्मलीमपि। श्लेष्मातकमपित्यक्त्वा ग्राह्योन्यः सकलद्रुमाः। अथ स्रुगादि॥ ॥
वैकंकतीवापालाशी अग्निहोत्रहवणी पथा। जुहूः पालाशी उपभृदाश्वत्थीवैकंकती ध्रुवा। यद्वा सर्वास्क्वा
कार्याः एतेषामन्यदवृक्षतः। शमीमपि श्रुवसर्वाः। सर्वावा खर्जूरतकाः। तरलावेषयथालाभमन्यपक्षियवृक्षजाः।

२४

खादिरस्रुवस्रुवः स्याच्च शम्याशिवमल्लणो खादिरो मुशलः कार्यः पालाशस्यादुलूखलः। यज्ञोक्तौ वारणौ कार्यौ
तदलाभेन्यवृक्षजौ। पालाशाद्यावदाद्यानुक्त्वा द्राव्यमसाः स्मृताः। आश्वत्थं वारणं नो वैरिडापात्रमिहात्यजं॥ ॥
मुख्यालाभे तु सदृशं द्रव्यं प्रतिनिधीयते। यावद्यावत्तु मुख्यांतत्तदेव हि गृह्यते। काम्ये प्रतिनिधिर्नास्ति नित्यनै
मित्तिके हि सः। काम्येप्युपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः। न स्यात्प्रतिनिधिर्मन्त्रस्वामिदेवाग्निकर्मसु। सं
देशकालयोर्नास्ति नारणेरग्निरेव सः। समारूढावसमिद्धमरणीं क्वचिल्लेभवाः। नालाबस्य प्रतिनिधिरलाबावुरमि
प्यते। नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्। श्रोत्रियाणामलाज्यंपद्रव्यं हितदशेषतः। ग्राह्यं प्रातिनिधित्वे
न होमकार्ये न कुत्रचित्। द्रव्यं वैकल्पितं किंचिद्यत्र संकल्पितं भवेत्। तदलाभे सदृक्षग्राह्यं न तु वैकल्पिकं।
तरं। मुख्यद्रव्यापचारे तु प्रतिनिधिप्रतिसंधिना। प्रवृत्तं जानस्य मुख्यार्थलाभेप्यात्तं सदेव हि। उपात्ते तु प्रतिनिधौ
मुख्यार्थलिप्यते यदि। तत्र मुख्यमनादृत्य गौणेनैव समापयेत्। उपात्ते यस्मिन्कस्मिंश्च वा मुख्योपचरितेषु
ति। अन्यद्रव्यं सजातीयं विजातीयमथापि वा। उपादाय प्रवृत्तं जानीयादिष्टं सर्वमवाप्नुयात्। उपात्तत्वाविशेषेपि

पूर्वं हित्वा परं श्रयेत्। मुख्याभावे यदा गौणमनुपात्तं समत्र विनश्यति। तत्र मुख्योपमं गौणं ग्राह्यं गौणोपमं न
तु। संस्काराणामयोग्योपि मुख्य एव हि दृश्यते। न तु संस्कारयोग्योन्योप्यलभ्यते प्रतिनिधिरूपकं। मुख्ये कार्यासम
र्थेपि दृश्यते प्रतिरूपकः। मुख्ये कार्यासमर्थे बलवैपेतस्यानादरः। प्रतिरूपमुपादाय शङ्कते न प्रभुज्यते
द्यवन्नमात्रपर्याप्तमुख्यद्रव्यस्य संभवे पुरोडाशमहत्वार्थं न नीवारपरिग्रहः। कृष्णव्रीह्यादिके द्रव्ये सि
द्धे पचरितेसति। ग्राह्या कृष्णोपि सद्व्रीहिः ना व्रीहिः कृष्णोपि। कार्ये त्वपेक्षयापणैः क्षीरैः पुष्पैः फलैर
पि। गन्धैरसैः सदृग्ग्राह्यं पूर्वालाभे परं परं॥ ॥व्रीहिर्यवो वा श्यामाको नीवारो वा हविर्भवेत्। वेणुयवाश्च
स्सं वा कंदमूलजलं फलं। सत्त्वं वा हविरेतेषु यथासंभवमाचरेत्। प्रतिनिध्यन्तरं सत्त्वं वितेयं हविरल्पये।
प्रधानदेवतोद्देशात् त्यजेत्सत्यमात्मनः। अतोन्यदपि वा ग्राह्यं सदृशं धान्यमात्रकं। न ग्राह्यं सर्वथा माष
वरकोदारकोद्रवं। यद्वा व्रीहियवालाभे उपात्तं जलयोगिनी। औषधी प्रतिगृह्णीयाद्वर्कोद्रववर्जितां। ग्रा
माणां पाणामलाभे ग्राम्यमारण्यानामरण्यजां। यवालाभे तु गोधूमाः स्मृता वेणुजवा तथा। छंदोगपरिशिष्टे त्वेवं

नाज्जुकृयाद्धविरल्पये। फलं याज्ञिकद्रव्यस्य तत्त्वमथवा जलं। यद्यग्निहोत्रहोमार्थं पयो न स्यात्कदाचन। तदा व्री
हियवौग्राम्यमौषध्यं तरमेव वा। आरण्यौषधयो द्रव्यफलान्याप्यतिक्रमात्र। होमं कर्त्तुमुपादेयं पूर्वालाभे परं परं
।तेषामलाभे जङ्घया श्रद्धया सत्पमात्मनः॥ ॥हव्यार्थं गोघृतं ग्राह्यं तदलाभेतु माहिषं। आजं वा तदलाभे वै
साक्षात्तैलं ग्रहीष्यते। तैलालाभे ग्रहीतव्यं तैलं जर्त्तिलसंभवं। तदलाभे तसीस्नेहः कौसुंभः सार्षपोद्भवः। वृक्षस्ने
होथवा कार्यं पूर्वालाभे परः परः। तदलाभे यवव्रीहिश्यामाकाम्यतरोद्भवं॥ ॥पिष्टमालोड्यतोयेन घृतार्थं योज
येत्सुधीः। हव्यतैलेषु पुन्नागनिंवैरंडोद्भवं त्यजेत। यद्वाग्राम्यघृतेछागमहिष्यादेघृतंक्रमात्। तदलाभे गवा
दीनां क्रमात्क्षीरं विधीयते। तदलाभे दधिग्राह्यं तस्यालाभे तैलमिष्यते। यत्राज्यमंजनाद्यर्थं लस्यते न कथं च
ना। तत्र क्षीराद्यना द्रव्यसाध्यं तैलं ग्रहीष्यते। यत्र मुख्यं दधिक्षीरं तत्रापि तदलाभतः। अजादेः क्षीरदध्यादि
तदलाभेतु गोघृतं। मुख्यासन्नोथवा ग्राह्यः कार्यकारणसन्नमो। अतएव घृतालाभे पूर्वं दधितत्तःपयः। येषां के
षां [illegible] विदन्येप्यहविर्मप्यसंभवे। सर्वत्राज्यमुपादेयं तरद्वाजमुनेर्मतात्र। मुख्यकालेयदावश्यं कार्मकर्तुंन

51

शक्यते। गौणकालेनुकर्तव्यं गौणोप्यत्र द्वयोर्लवेत्। साध्यमाङ्गानिराप्रातरा सायंप्रातराहुतिः। कर्त्तव्या नानिपद्ये
तपार्वणं पर्वणोन्तरात्। श्यामाकैर्व्रीहिभिः स्थैर्यवैरन्योन्यकालतः। आग्रयणं तु ज्यतेवश्यं नाचरेदाग्रायणं त्वपथः।
एवमागामिकार्यस्य मुख्यकालोदयक्षितः। स्वकालात्तु तरो गौणकालः पूर्वस्य कर्मणः। सर्वत्र गौणकाले तु
कर्म चोदितमाचरेत्। प्रायश्चित्तं यथाहतिकृत्वा कर्म समाचरेत्। मुख्यकाले हि मुख्यं वै तत्साधनं नैवलस्यते। मु
ख्यकालत्ययाश्रेयो गौणमप्यङ्गसाधनं। न मुख्यद्व्यलोलेन गौणकालव्यतीक्रमं। एकपक्षगतो यावान्होमसं
घोतिपद्यते। पक्षहोमविधानात्तान्हुत्वा तरुमतीर्यजेत्। स्वकालोत्कर्षतः कश्चिद्गौणः कालो निरूपितः। अप
कर्षाद्यथान्योपि गौणः कालो निरूप्यते। आमयाद्याधिमाना पञ्चतो वा ध्वगतोपि वा। राष्ट्रभ्रंशे येनाला वे
युनगेहेवसन्नपि। अन्येष्वेवं प्रकारेषु निमित्तेष्वागतेषु च। समासमग्निहोत्राणां यथासत्त्वं समाचरेत्। निमित्ता
नामिहैतेषां निर्दिश्यैकं यदुच्यते। तत्सर्वं निमित्तेषु जानीयात्प्रतिपादितं। पक्षहोमान्तशेषांश्चागेयहोमान
थापि वा। समस्य जुहुयान्नत्वप्रयोगो यं निरूप्यते। प्रतिपद्दिवसे सायमापद्यन्यत्रवादिने। आवर्त्योवसुध्याहा
प्रातर्दिनानि लवंतिहोतावंतिपरिगृह्णीयाच्चतुरं नयनानि तु। पात्रान्तरसहार्याणां नित्यायां प्रक्रान्ते श्रुचि। श्रुते

स्रुगंतरेणापि हुत्वा तत्र समुन्नयेत्। एकास्मिन्‌ सकृद्धोमः सकृदेव निर्मार्जनं। उपस्थानं सकृत्‌ कार्यं शेषाण्यावृत्तिरिष्यते।
एवमेवोन्नरत्रापि प्रातर्होमासमस्यतु। जुहोत्योपवसथ्याह प्रातर्होमावधी सकृत्कृत्। समारोपविधानेन समारोपय
तेनलात्। एवं प्रतिपदो यत्र यत्रापं ड्डुपजायते। तथैवोपवसथ्याधाज्ययत्रा ह्यापद्विनश्यति। आपदेवावधिर्होम
समासस्याशु पेयते। तस्मात्कदाविदारल्पापावत ह्यावतोपिवा। आपत्कालसमानहोमात्समस्योदकपद्धकोच।
एवमेकाचपद्धेयेहोमाज्ञेषाम शेषतः। न्यूनानां वा समासः स्यान्नपत्नान्तरवर्त्तिनां। सर्वथोपवसथ्याहे सायं होमः थ
थस्त्ववेत्। तथैवयजनीयाहे प्रातर्होमालवेत्‌ पृथक्‌। पर्वोपवासपट्टन्यं चेत्प्राप्तं केनापि हेतुना। तदातत्सायं होमोपि पृथ
सहसमस्यते। तावतानापगच्छेवेक्षपत्यपक्षान्तरेपिवा। पुनस्तत्रापि कर्त्तव्यः समासः पृथगेव हि। नउपत्ना न्तरस्थानां सम
सश्चाद्यतेमिथः। एवमापद्गतः पद्मेपक्षेचैवं समाचरेत्। तृतीयेनन्तरेपक्षे समासं न समाचरेत्। आपवेदनुवर्त्तेतदी
र्घकालं कथंचन। यावज्जीवमविच्छिन्नपक्षहोमः समाचरेत्। आपदेवावधिस्तत्र न पक्षगणनावधिः। अथापत्स
मासस्य प्रकारः प्रतिपद्यते। सायं प्रातस्तनौ होमावुलौ सायं समस्यतु। आपन्नो जुहुयात्तत्र समिदेकाथवाद्वयं।।

सायंहोमस्यमुख्यत्वात्तदीयंतन्त्रमिष्यते।ततश्चआहुतीःकुर्यान्नदेसायमाहुतीर्द्वेप्रातराहुतीसायंहोमेचैकासमिद्यदिम
मिल्हुताद्वितीयावेत्सालवेप्रातराहुतौ॥द्विःसायंहोमवन्तूष्णींद्विःप्रातर्हो।मयेश्रुचं।उपस्थानेसहाकार्यंशेषंप्रकृतिवद्भवेत्।
केचित्तुआहुतीर्हुत्वासंविश्यैवनिमील्यवा।विच्छिद्यैतावताहोमोकुर्युर्द्वेआहुतीततः।युर्द्वापरिसमथ्यन्तेप्रातःसर्वं
करोत्वना।दीर्घकालापर्देलत्वापन्नहोमेकृतेसति।तन्त्रान्तरालेयद्यापत्करादिविदपगच्छति।कालेकालेतुनर्होमःकर्त्त
व्योविधिनानवा।यावंतोत्रसमासास्त्रेसर्वेसायमुपक्रमाः।प्रातःकालापवर्गाश्चनतुप्रातरुपक्रमाः।प्रातर्होमादिको
यद्वाप्रातश्चेदापदागता।तथापूर्वीपराह्नादौनिमित्तेवसमस्यति॥ ॥पूर्वपक्षेतुरात्रौचेन्मृतिशंकाग्निहोत्रिणः।सा
यंहुत्वातदैवाथजुहुयात्प्रातराहुतीः।यदित्वपरपक्षेस्यान्मृतिशंकाग्निहोत्रिणः।सायंहुत्वातदेवाथजुहुयात्प्रात
राहुतीः।यदित्वपरपक्षेस्यान्मृतिशंकाग्निहोत्रिणः।हुत्वावशिष्टापक्षेस्मिन्जुहुयात्सकलाहुतीः।दर्शेष्टिंचतदाकुर्या
दिष्टिर्यदिनसंलवेत्।देवतानांप्रधानानामेकैकस्यपृथक्पृथक्।पुरोनुवाक्यायाज्याभ्यांचतुर्गृहीतघृताहुतीः।जुहु
यादेवमन्यत्रसर्वत्रापदिहूयते।अथेष्टाधानमध्येस्यात्पत्नीमरणशंकनं।अवशिष्टेष्टदेवेभ्यःसंस्थाप्यानि

घृतानि चाचतुर्गृहीतान्येकत्र गृहीत्वा चमसे सहाग्नुरोत्रुवा कथायाग्न्या तिष्ठर्वत्र्जुहुयात्तथा। वा तन्मसिं पांतराले
ष्यात्स्वामिनो प्रत्युशंकनं। तत्रांत्यपर्वपर्यंतं अग्निहोत्रा एणशेषतः तदेवक्रुरुते दर्शाद्यो एोमासा च क्रुनपि चात्र
मांस्यावशिष्टानि पर्वाण्येकस्मा पयेत्। पशुलाते पुरोडाशं निर्वपेत्पशुदेवतां। आमित्तामथवा क्रुर्यात्प्रणोक्र
ति मध्यापि वा। आहिताग्निः कदाचित्तु कृत्स्नपत्ते प्रतो यदि। तदा शेषा क्रुतीः। सर्व्वा जुहोतीत्याश्वलायनः। अन्येत
देवदर्शोष्टिं कुर्युः कृत्स्नेशृतस्य तु। शुक्लपक्षे निशि प्रेतस्पे छंतिधातराकुतिं। पत्रो हिताग्नेर्यमस्यात्स्रौपासनिक
स्य तु। इतिशाबायनिकमा च छेद्भ्रांहाराग्मत्रयाासंख्यामिष्टिं च तु होमं यावज्जीवं समाचरेत्। नत्यजेत्स्वन केव
पितृपजरगा छेदधो द्विजः। कुर्यात्तेन महायज्ञान्नित्य श्राद्धस्तकं विना। नित्यं नैमित्तिकं चान्यत्स्वकर्म्मापि न
हापयेत्। स्वकर्म्महानोपतनमहं नैवत्वमापदि। स्वकर्म्महानो नास्तिक्या न्मासेन पतनं स्मृतं। द्वादश्याद्ब्र
तेनैव तस्य शुद्धिस्तु नान्यथा। तन्निरीक्षा कर्म्मीनेता स्पर्शे स्नायात्सचैलकं। तेन संलापणं हासं कुर्वन्नर्द्दे न तत्स
मः। तदन्नभुक्तौ सद्यस्तु सहशय्यासनेषु वा॥ ॥इति होमविधिः॥ ॥अथ देवतार्च्चनविधिः॥ ॥ब्रह्माणं विष्णुमी

शंवासूर्यमग्निंगणाधिपंदुर्गांसरस्वतींलक्ष्मींगौरींवानित्यमर्चयेत्॥ अप्स्वग्नौहृदयेसूर्येस्थंडिलेप्रतिमासुच।
शालग्रामेवचक्राकेपदेमुद्रासुदेवता॥ नित्यंसंनिहिताप्येषुरत्नगोब्राह्मणेषुच। पौरुषेणैवसूक्तेनगायत्र्या
प्रणवेनवा। तल्लिंगैरथवामंत्रैरर्चयेद्भक्तितया। देवतानाममलिंगाद्यैश्चतुर्थ्यंतैर्नमोन्वितैः॥ आवाहनास
नंपाद्यमर्घ्यमाचमनीयकं। स्नानमाचमनंवस्त्रमाचामंयज्ञोपवीतकं। आचामंगंधपुष्पंचधूपंदीपंप्रक
ल्पयेत्॥ नैवेद्यंपुनराचामंन त्वास्तुत्वाविसर्जयेत्॥ स्त्रीशूद्राणांचसर्वतिनाम्नावैवस्तुरार्चनं। सर्वेवाग
ममार्गेणकुर्युर्वैदानुसारिणः॥ मुद्रकेनप्रकारेणवेदवाद्येननार्चयेत्॥ यांकांचिदेवतांकश्चिदाराध
यितुमिच्छति॥ ससर्वपापयतेनब्राह्मणाद्याश्चपूजयेत्॥ ॥एवंदेवार्चनंकृत्वायतुसंस्कृत्यसत्क्रियतः।
पुष्पंहित्वाप्राणम्याथनित्यदानंस्वशक्तितः॥ कृत्वोद्धृत्वानमस्कृत्यकर्तव्यंमंगलेक्षणं। विप्राग्न्यर्कौ
घृगोहेमदर्पणंमंगलंस्मृतं॥ अग्निविल्वकपिलासत्त्रीयज्ञावृष्टनृतसेंधुयक्षिः॥ ज्ञानसिद्धतपःसिद्ध
शतायुर्धार्मिकाःशुचिः। एतेपापहराश्चैतान्सदापश्येन्नमेवापि। रोचनंचंदनंहेमंमृदंगंदर्पणंमणिं।

घ्टांवामिंगुंतुविंबंप्रातःपश्येत्सदाबुधः॥ कमलब्राह्मीवद्दर्पविचंदनंशंखशुक्तिकां॥ सिद्धार्थकांप्रियंगूंश्चप्रा
तःशिरसिधारयेत्॥ पापिष्ठंदुर्भगंवांधंनग्नमुत्कृत्तनासिकं॥ प्रातर्न्नपश्येदेतांस्तुदृष्ट्वापश्येद्दिवाकरं॥ ॥
इतिदेवतार्चनविधिः॥ ॥अथमध्याह्नस्नानंकृत्वानित्यंमाध्याह्निकंकार्यं॥ तत्रपादौप्रक्षाल्यद्विराचम्यापो
हिष्ठाद्यैर्मार्जनंकृत्वाद्भिःपरिषिच्यगायत्र्यासकृत्सूर्यायार्घ्यंदत्वाप्रदक्षिणामावृत्यापःस्पृष्ट्वाहंसःशु
चिषदित्तिसूर्यमुपस्थायउदुत्यंचित्रमित्याद्यैश्चोपस्थाप्यनत्वाभूमिंस्पृष्ट्वाप्राणायामत्रयंकृत्वागायत्री
स्पर्शवर्जयेत्॥ पुनःसूर्यंनत्वाब्रह्मयज्ञादिकान्कुर्यात्॥ ब्रह्मयज्ञोदेवयज्ञोभूतयज्ञस्ततःपरः॥ पितृयज्ञोर
यज्ञश्चपंचयज्ञाःप्रकीर्तिताः॥ अध्यापोब्रह्मयज्ञःस्याद्देवयज्ञोग्निहोमकः॥ भूतयज्ञोबलिःप्रोक्तोहुतशेषा
न्नतस्मृतः॥ पितृयज्ञःस्वधापितृभ्यस्तर्पणादिदानतः॥ मनुष्ययज्ञोतिथ्यादेर्मनुष्योद्देशदानतः॥ ॥अथब्र
ह्मयज्ञंकुर्यात्॥ ॥तत्रपादौप्रक्षाल्यद्विराचम्यप्राग्गर्भेषुदर्भेषुप्राङ्मुखआसीनोदर्भपाणिःपवित्रगर्भ
ब्रह्मांजलिप्रणवव्याहृतीरुक्त्वासावित्रींपच्छोऽर्धर्चशःऋक्छोऽनवानंवोंकारप्रणवकृत्वाचंस्वक्रमशवा

स्म·अ·
२९

र्कवायजुर्वासामवासाविंवींचेतिहासंपुराणंवामंद्रेणमध्यमेनवास्वरेणाधीत्यनमोब्रह्मणइतित्रिरुक्त्वा।
तत्ररसंस्थांप्रातरल्पउंतत्सदितिसमापयेत्।ग्रामेमनसाधीयीततमः।स्वःशाखोक्तविधिनादेवान्टषींपितॄं
श्चतर्प्पयेत्।यद्वाब्राह्मादयोदेवास्तत्पाद्यैर्यथाचारंकुर्यात्।ततोवस्त्रंनिष्पीड्याचम्यागःपावुगृहीत्वा
गृहंगत्वावैश्वदेवंकुर्यात्॥ ॥अथदेवयज्ञः।गृहस्थोवैश्वदेवाख्यंकर्मप्रात्स्ततेदिवा।अन्नस्थचात्मनश्चैवसं
स्कारार्थमिहेष्यते।औपासनाग्निमन्यंवासमिध्यपरिसमुह्यपर्युक्ष्यअन्नतगंधपुष्पाण्यपष्टादिकुर्वन्ग्नौ
वह्निस्थालेकृतंपहविष्यंपक्वंघृतप्लुतंहविष्यव्यंजनोपेतंवायथास्वाचारंकृत्वापरिसमूह्यपर्युक्षेत्॥ ॥अ
थवलिहरणं।देवयज्ञकृतशेषेणशुचिदेशमभ्युक्ष्यतत्रकुर्यात्॥अथपितृयज्ञः॥तत्रभूतयज्ञवलिहरण
शेषंसोदकंस्वधापितृभ्यइति।प्राचीनावीतीदद्यात्।ततस्तथैववर्हिर्निवेशनांतेसोदकमन्नंभूमौखंड
लपतितंवाघसेभ्यश्चनिक्षिपेत्।एतद्देवयज्ञपितृयज्ञभूतयज्ञावैश्वदेवमित्युच्यते।अहविष्यंसमस्तं
वावैश्वदेवेविवर्जयेत्।यद्वा।कोद्रवंचणकंमाषमसूरंचकुलत्थकं।क्षारंचलवणंसर्वंवैश्वदेवेवि

२९

वर्जयेत्॥ घक्षाक्षारलवणं॥ होमो विद्यते॥ तथा परसंसृष्टस्य च हविष्यस्य होमे तदीचीनमुद्धृत्य समापोह्य तस्मि
न्जुहुयात्॥ तद्भुक्तमुद्धृतं चाग्नौ स्वतिन स्त्री जुहुयात्॥ यद्वा सलस्मांगारे भ्रजुहुयात् दत्तविष्यकं॥ अथ च म
नुष्ययज्ञं कुर्यात्॥ तत्रातिथ्यादिमर्चयित्वा निवीती सनकादिमनुष्येभ्यो हंतेति दद्यात्॥ यद्वाग्रं हंतकारं
वा हंतेति वा मंत्रं जपेत्॥ सर्वथान्नं पितृमनुष्येभ्यो देयं वापि जलं तथा हाकारं स्वधाकारं नमस्कारादिवौकसां॥
स्वधाकारः पितृणां तु हंतकारो नृणां स्मृतः॥ पक्वालाभे यवा सेचतंडुला नोषधीस्तु वा॥ पयो दधि घृतं वा
पि कंदमूलफलादि वा॥ यो जये देवयज्ञादौ जलं वाप्सु वा जले॥ इदं स्वेन होतव्यं पाणिना कल्पितं न हवि॥
स्नातको ब्रह्मचारी वा गृहस्थकः काकी वैश्वदेवं कुर्यात्॥ स्त्रीबालस्थकारयेत्॥ होमाग्रदानरहितं लोके व्यंजनकं
यं च वना अविलक्षेत्र संसृष्टेऽग्न्ये केनापि कृतं तु यत्॥ देवयज्ञादिसर्वार्थं लौकिकाग्नौ कृतं यदि॥ इत्तनपाःफ
लं स्थलं तांबूलं पयश्चौषधं जलमपि वा पि कर्तव्या मानदानादिका क्रियां॥ कुर्यादहरहः श्राद्धमन्नाद्येनोद
केन वा॥ पयोमूलफलैर्वापि श्राद्धानन्यानि तत्क्रितः॥ ॥इत्यादि स्मृत्यर्थसारे आचारप्रकरणं समाप्तं॥ ॥८॥

स्म॰ श्रा॰
३०

कामधेनौ प्रदीपे चौ कल्पद्रुमलतादिषु। शंभुद्राविडकेदारलोलटाद्यैश्च भाषितं। मत्वा ह्यनेकस्मृतिभ्यश्च
ख्यात्प्रतिपादितं। स्मृत्यर्थसारं वक्ष्यामि सुखानुष्ठानसिद्धये॥ ॥अथ श्राद्धविधिरुच्यते॥ ॥तत्र तावत् श्राद्धं
द्विविधं॥ ॥पार्वणमेकोद्दिष्टमिति। तत्र पित्रादित्रयाणामुद्देशं पार्वणं एकोद्देशेन एकोद्दिष्टं। तच्च त्रिविधं नित्यं
नैमित्तिकं काम्यं चेति। तत्र नित्यमहरहरमावास्याष्टकादिषु। नैमित्तिकं पुत्रजन्मादिषु। काम्यं फलार्थि
नां तिथिनक्षत्रादिषु। पुनश्च पंचविधं। अहरहःश्राद्धं। पार्वणश्राद्धं। एकोद्दिष्टं। वृद्धिश्राद्धं। सपिंडीकरणं चेति।
। तत्र श्राद्धदेशः। भूमिः अस्थिकेशश्लेष्मादिरहितः शोधितो दक्षिणप्रवणो गोमयेनोपलिप्तः॥ ॥अथ श्राद्ध
कालाः। अमावास्याष्टकावृद्धिकृष्णपक्षोऽयनं विषुवत् सूर्यसंक्रमो व्यतीपातो गजच्छाया ग्रहणं युगादि
मन्वादयश्च। तथा विशिष्टदेशगयादौ विशिष्टकाले च भृताहादौ द्रव्यब्राह्मणसंपत्सु चात्मरुचिश्चेत्या
द्याः कालाः। अथ भोज्याः ब्राह्मणाः। अभिज्ञातपूर्ववंश्यः तदध्ययनसंपन्नो वेदार्थवित्। ब्रह्मवित्। त्रिमधुः

३०

त्रिसुपर्णो ज्येष्ठसामगः ऋत्विग्याज्यादिश्च अथवा दौहित्रो भागिनेयो जामाता मातुलः श्वशुरः शिष्यः सर्व

धिवां यवाः। कार्म्मनिष्ठस्तपोनिष्ठः षडग्निः पंचाग्निश्च त्रग्निः विताग्निरेकाग्निर्वेदाभ्यासी यतिर्ब्रह्मचारी तपा याः शस्ताः॥ अ
थ निषिद्धाः॥ ॥रोगी हीनातिरिक्तांगः काणो बधिरो नपुंसको विद्धप्रस्तो जारो राजा स्पर्तिर्न्निजिह्मः स्तेनः कुनखी दु
श्चर्म्मावकीर्णी पौनर्भवः। कुंडगोलौ निषिद्धान्नाशी मेद्रुगः शीष्टताध्यापी ष्टताध्यापकः कन्याद्रष्यास्त्रि शस्त्रो
मित्रध्रुक् पिशुनः सोमविक्रयी परिवित्तिः परिवेत्ता तयोर्दातृयाजकौ च तथा मातृपितृगुरुत्यागी
पुनर्भूपतिस्तेनः कितवो देवलकः कर्म्मभ्रष्टो विहितत्यागी निषिद्धग्राही इत्याद्या वर्ज्याः॥ ॥सर्वत्र शास्त्रालाले नि
षिद्धरहितेयात्यं। नित्यश्राद्धे वैश्वदेवपूर्वं बलिं च पूर्वमेव दर्शश्राद्धे वैश्वदेवं पूर्वं पश्चाद्वा। हृद्भाव दोह्यपाद्धे न्ने
दर्शे मध्ये महालये। आवर्तितेषु च कर्त्तव्यं वैश्वदेवं तत्र विधिं गृहबलिश्च पश्चाद्देव अन्वष्टश्राद्धे सर्वपश्चाद्देवकार्ये
॥ अथामावास्यापार्वणश्राद्धमुच्यते। तत्र पितॄणां मातामहानां च कार्यं तत्र पूर्वेद्युस्तद्दिने वा नियतो नियतांश्च
ब्राह्मणान् श्राद्धेक्षणाय स्थापनामिति निमंत्र्य ता नाहूय प्रागतं पूर्व्वाह्णे आगतमित्युक्ते दाहनीली छि आ
दिवर्जिता हतश्मश्रु शुद्ध दिवस्त्रो हि रावणमपराङ्मुखः। कृतगोमयमंडले कुशयवगंधाद्यर्चिते वैश्वदेवब्राह्म

३१

पादांनुपवाती। सूर्यालिप्तखंश्च स्वाल्पकुशति लगं धाय्यर्चितमंडले पित्र्यर्थब्राह्मण पादात्प्राचीनावीती स्वाल्प
स्वयं दिशा वा नोदिशा वान्नानुपवेशयेत्। तत्र वैश्वदेवार्थब्राह्मणौ प्राङ्मुखौ द्वौ लेख्या दितदाह्मयः संबंधवर्जिते
स्थले स्वच्छपाठ्ये पीठे नेपालके वस्त्रेवा तासनेवा उपविश्य पत्नीत्रिप्रान् उदङ्मुखान् पित्रर्थमुपवेशयेत्। एकैकप
क्षे केकस्य वोप वेशयेत्। मातामहादीनां चैवं तत्र वा वैश्वदेवं स्यात्। ततो गृहाद्दक्षिणे कुशांस्तिला विकीर्य ब्रा
ह्मण समीपे कुशेषु प्राङ्मुख उपविश्य पूर्वं देवगणं देवानां वस्वादीन् पितॄन् रुजनोर्दनी। वनत्वा कृत पारिका
ले समंत्रकामं त्रकं प्राणायामद्वयं कृत्वा प्राचीनावीती पितॄणां पितामहानां प्रपितामहानां सपत्नीकानां मा
तामहानां मातुः पितामहानां मातुः प्रपितामहानां सपत्नीकानां अमुकनामगोत्राणां एतस्मिन् काले सदेवपार्व
ण श्राद्धं युष्मदनुज्ञया करिष्ये इति संकल्प्य अपहता असुरा इति। सर्वतस्तिलान् विकीर्य उदीरतामिति वा प्रो
क्षेत्। देवं सर्वत्र उपवीती प्रदक्षिणं युग्मत्वं पूर्वं मुद्गगपवर्गं उदङ्मुखः कुर्यात्। ततो वैश्वदेवार्थं विप्रहस्ते
अपो दत्वा पुग्मात् कुशान् रक्तान्नासने वा आसने दक्षिणतो विश्वेषां देवानां इदमासनमिति यव सहितं दक्षिणे पे

३१

आसनेत्वासनंदद्याद्दक्षिणहस्तेनकुशपवित्र। ततः पुनरपोदत्वा निमंत्रयेत्। दैवे क्षणः क्रियतामिति। ॐ तथेति विप्रो
ब्रूयात्। ततः प्राप्नोतु भवानिति कर्त्ता ब्रूयात्। प्राप्नवानीति पुनर्विप्रो ब्रूयात्॥ ॥इति ग्रंथसंग्रहकारस्मृतिः।
॥अक्षय्यासनयोः षष्ठी द्वितीयावाहने स्मृता। अन्नदाने चतुर्थी स्याच्छेषाः संबुद्धयः स्मृताः॥ इति
श्लोकसंग्रहकारस्मृतिः॥ ॥यद्वा सर्वत्र चतुर्थ्येव प्रयोज्या आवाहनवर्जं सर्वत्र पुनः पुनरपो दद्यात्। पुनरेव
ईवान् विश्वान्देवानावाहयिष्ये इति पृच्छेत्। आवाहयेति तैरनुज्ञातो विश्वेदेवास आगत इत्यृचा वाऽऽवाहयेद्वा द्वे
णपालादि मस्तकोर्ते समारोप्य विश्वेदेवाः शृणुतेमं हवं मे। आगच्छन्तु महाभागा इत्यादि ऋचा उपस्थाय तत्सामी
पेक्ष मौय वा विकीर्य कुशानास्तीर्य तत्र सुवर्णादि तेजसाश्ममयमृन्मयपलाशपत्राद्येकद्रव्यपात्रद्वयं दिक्कु
शन्नुर्वाताहिंत शन्नोदेवीरभिष्टय इत्यृचा यो निविद्य यवोसि धान्यराजस्त्विति वा यवांस्तिलांश्च पुष्पादि वह्नि
त्वा स्वाहार्घ्यानिति निवेद्य विप्रहस्ते कुर्यात् ... यादिव्या आपः पयसेत्यृचा विश्वेदेवा एषवोऽर्घ्यमिति तद्ध
स्तेरर्घ्यं दद्यात्। ततो विश्वेदेवा अयवो गंधस्त्वादि प्रयोगे गंधादि दद्यात्। श्रीखंड कर्पूर गुरुपद्मकादिना

63

३२

धानुलेपनंकर्त्ताकुर्यात॥ गंधंदत्वाकर्त्ताअदर्भेणहस्तेनांगुलिंलिंपेत॥ नसदर्भेणहस्तेनलिंपेत॥ ब्राह्मणाःस्वयमंगुलिं
पेद्वेत्रायंनियमः॥ ततोजातिमल्लिकाश्वेतयूथिकाचंपककुंकुमजात्यादीनिपुष्पाणिमरुवकादिसुगंधप
त्राणिचदेयानि॥ उग्रगंधीन्यगंधीनिचैत्यक्त्वाजरकांत्यक्तानिअगंधिकंटकिजानि॥ अर्कधत्तूरशिरीषकां
चनानतुलसीविल्वादीनिवर्ज्याणि॥ ततोघृतमधुसंयुक्तगुग्गुलुश्रीखंडागुरुसरलादिसंभवेसमश्रोव्यस्तो
वाधूपोदेयः॥ घ्राणंपंगहस्तवातहतंधूपंवर्जयेत॥ ततोघृतेनातिलतैलेनवानिषिद्धेनवादीपंदद्यात॥ वसामेद
वंवर्जयेत॥ ततःशुक्लंशुद्धमहतंसदशंवस्त्रंआच्छादनंदद्यात॥ तन्मूल्यंवा॥ अलाभेउत्तरीयंयज्ञोपवीतंवा
शक्त्यादद्यात॥ ततोअर्चनंसंपूर्णमस्त्वितिब्रूयात॥ अस्त्वितिचैतेब्रूयुः॥ संकल्पसिद्धिरस्त्वितितवक्ताब्रुवंत्वि
तिकर्त्ताब्रूयात॥ अस्तुसंकल्पसिद्धिरितिविप्राःप्रतिब्रूयुः॥ आसनादिषुसर्वत्रस्वासनंसार्घ्यंसुगंधंसुपुष्पाणि
सुमाल्यंसुधूपःसुदीपःसुज्योतिःस्वाच्छादनमितिविप्राःप्रतिब्रूयुः॥ ॥ इतिसंग्रहकारस्मृतिः॥ ॥ अथपिंडं
प्राचीनावीत्यप्रदक्षिणंप्रसुमात्रस्ववेदक्षिणाग्रंदक्षिणापवर्गंदक्षिणासुरवःकुर्यात॥ पितृरूपवारेएकैकंव

३२

नंवकुवचनंवाप्रयोज्यंजघन्येष्वेकवचनमेवपित्र्याविप्रहस्तेथपोदद्यात्स्वधायमकुशासतिलाद्विगुणानासनेष्वा
सनंपितॄणामिदमासनंपितामहानामिदंप्रपितामहानामिदमितिवापितुरिदंपितामहस्येदंप्रपितामहस्येदमा
सनमितिवा॥पित्रेपितामहायप्रपितामहायेदमासनमितिवापितृरूपःपितामहरूपप्रपितामहरूपइदमासनमितिवा
आसनंवामस्तागेदद्यात्।मातामहेष्वेवंततश्श्राद्धेक्षणः।क्रियतामित्यादिलिखितमंत्रपितृपितामहप्रपि
तामहानावाहयिष्यइतितिलहस्तोब्राह्मणान्पृष्ट्वापितरंपितामहंप्रपितामहंमावाहयिष्यतइतिवाष्टव्या।आवा
हयेतिविप्रैरनुज्ञातउशंतस्त्वेत्यृचावावाह्यतिलान्नसकादिदक्षिणपादांतमारोप्यायंतुनइत्युपतिष्ठेत।मा
तामहेष्वेवंकृत्वापितृसमीपेऽस्मोतिलाद्विकीर्यकुशेषुराजतादिद्रव्योक्तपात्रत्रयेकुशकूर्चान्न्यस्येतिशं
न्नोदेवीरित्यपोनिषिच्यतिलोसिसोमदेवत्यइतितिलान्निक्षिप्यगंधपुष्पादिवेद्धितार्घ्यपात्रइतिनिवेद्यविप्र
हस्तेकूर्चंक्षिप्त्वायदिव्याआपइत्यनेनपितरिदंतेऽर्घ्यंपितामहेदंतेऽर्घ्यंप्रपितामहेदंतेऽर्घ्यमितिक्रमे
णार्घ्यंदत्वास्वधार्घ्यावादत्वातत्स्रवान्निस्रुतार्घ्योदकंपितृपात्रेप्रासिच्यदक्षिणाग्रेषुकुशेषुपितृरूपःछायान्मसी

65

३३

तिसपवित्रं स्वजं कुर्यात्॥ स्वं स्वं हैत्वावा॥ तस्योपर्यर्घपात्रपवित्राणि क्षिप्त्वा तिलपुष्पादि क्षिपेत्॥ तत्पात्रमास
माश्रेन्न चालायत्॥ मा ता म हेभ्र्वैवं॥ अलाते एकं पात्रं त्रिपवित्रं कार्यं तु शंतस्त्रायंत्रनास्त्रिलोसिमं त्राणा सूहोन
कार्यः॥ दैवे पित्र्ये च पात्रनिवेदनात्॥ तेआवहनमितिकोवित्॥ ततः पितृस्यते गंधाः॥ पितरश्चार्घं वीगंधः स्पादि
योगे गंधमाल्यपुष्पाणि दद्यात्॥ ललादे पुण्ड्राकारस्कंधे मालो च वर्जयेत्॥ धूपदीपं ज्योति राच्छादनानि द
द्यात्॥ दैवे पित्र्ये च आसनस्थापनावाहनार्घ्यासनगंधपुष्पधूपदीपाच्छादनानां पदार्थानुसमये सति सं
तति हृदि व कांडानुसमये विविसिद्धिरेव ततः संकल्पसिद्धिं तु कुर्यात्॥ अथ गोमयेन चतुरस्रमंडलं
कृत्वा दैवे सौवर्णादीनि पात्राणि पित्र्ये रौप्यादीनि पात्राणि स्वर्णरौप्य॥ वपृष्टान्यन्यानि पात्राणि वा॥
न्मपवर्जितानि मंडले निधाय तत्रापो निषिच्य हस्तेन निःसृज्य पात्ताल्पभुनर्जले नैव त्रा॰ यत्॥ अथा
ग्नौ पाणौ वा होमः॥ निरग्नेः पाणावेव तत्र घृतांक्तमन्नं घृतं वा दायाग्नौ करिष्य इति पृष्ट्वा कुरुष्वेत्यनुज्ञा
तश्चौपासनाग्निमुपवीती परिसमुह्य पर्युक्ष्य प्राचीनावीती त्रिः सोमिपभमध्रा वा वायमेज्ञा॰ स्क्वेणोपस्थ

३३

र्यंवदानद्वयंदिक्षापंवावलीदेत्रयंदिक्षाउनःध्वेणातिर्घार्यादायमेक्षणेनसोमायपितृमतेस्वधानमःअग्नयेकव्य
वाहनायस्वधानमःस्तालंमंत्राभ्यामाहुतिद्वयंकृत्वामेक्षणमग्नावेवप्रहृत्यहुतशेषंपितृपात्रेषुक्षिपेत्ततोदेवपा
त्रेषु।आहिताग्निःसर्वाधानीदक्षिणाग्नौजुहुयात्।पित्र्यविप्रपाणौवाथअग्नावेपाणौहोमः।पाणौहोमेस्वधामेत्र
णविप्राःस्वस्तुज्ञानसंति।पित्र्यविप्रपाणिंपरिसमूह्यपर्युक्ष्यवामेनोपस्तीर्यदक्षिणेनावदायप्रत्यातिघार्यंकृत्वा
परिसमूहनपर्युक्षणेस्तः।मातामहश्चैवं।तत्रसाग्निमापाणिंहुतंतदैवप्राक्ष्पावम्योपविशेत्।अथवाभाजने
क्षिप्त्वास्वस्थोपविशेत्।अस्मत्पावकृतंतत्रपूर्वंनाश्नीयात्।भोजनकालएवाश्नीयात्।पश्चात्कामिकृतंनैवाश्नी
यात्।प्रेतश्राद्धेवान्तदग्नौक्षिपेदित्याहुः।ततोदेवपूर्वमुपस्तीर्यस्वयंपत्नीवान्योवानियतात्माशश्वद्धविष्यान्न
पूर्वंपरिवेषणंकुर्युः।नापवित्रेणहस्तेननैकहस्तेननायसेननहस्तेनपरिवेषणंकुर्युः।तृणपर्णाद्यंतर्धानेन
दोषः॥ ॥अथहविष्याणि॥ ॥व्रीहिशालियवगोधूमप्रियंगुमुद्गमाषपष्पामाकनीवाराद्याः॥ ॥कालशाकं
महाशाकंद्रोणशाकंमेथ्यामासंमद्गाशकादिरक्तुकदलीपनसाम्रातकाम्रवर्जुरिराजजंबुगोस्तनीद्राक्षाप्रियाल

स्म·श्रा·

मलकनारिकेलत्रपुसेर्वारुकाविलिंटपालेयगुडुफलमधुफलमधुरोत्तमफलं पद्मादि। एला शुंठी चाईक
हिंगुमरिचपिप्पलीमधुकगुडशर्कराखंडकर्पूरसैंधवमानसलवणानि मधुरयुपयोदधिघृततीत्यादीनि
प्रशस्तानि। एतत्संस्रवमोदनसूपपायसलत्तपानादिकं ववकुपरिवेष्यं हिंगुशुंठीपिप्पलीमरिख्यानिद्रव्य
संस्काराद्यानिशास्त्रेक्तुः। नप्रत्यत्तेणालवणानि॥ अथाहविष्याणि॥ ॥कोद्रववणकमसूरकुलत्थराजमाष
रक्तविदलमाषाः सत्वचआटकाः कृष्णपावनालकूष्मधान्यानि मुजमाषतिलव्यतिरिक्तानि वर्ज्यानि।
उपोदकीतुलसीसिग्रुः महाशार्षपपत्रशाककृष्णसर्षपश्वेतिगंधशाकानि कूष्मांडपरोलवार्ताकु लिंग
षतोहस्तिकच्छहतीहयालाबुगांधारिकापिंडस्थूलबिल्वफलकाचनालकपित्थकतककरंजकरवंदका
लिंगावंशांकुरपिचर्थालसायायावितं शुक्ताहृतं सर्वं कृष्णजीरकशतपुष्पीविडलवणादि। आएणस्थग मरि
चीवमरीपयोदधिघृतमित्यादीनि अप्रशस्तानि वर्ज्यानि। प्रशस्तालालेत्वनिषिद्धंयात्यांश्च पात्रेशुपरि
वेष्यं देवेपात्रेसत्कुशयवानादिक्षिप्य पात्रे पर्युक्ष्य पृथिवीतेपात्रमित्यातिमंत्र्यातादेवाइत्यत्र ... विष्णोः

३४

यंरत्नस्वेत्यनेनद्विजांगुष्ठंनिवेश्यपुरूरवार्द्रवाविश्वेदेवादेवताइदमन्नंहविर्ब्राह्मणस्त्वाहवनीयार्थेस्वयंद्रगोपु
पंब्राह्मणोगदाधरोविश्वेभ्योदेवेभ्यइदमन्नंपरिविष्टंपरिवेष्यमाणंचातृप्तेरन्नंममेतियवोदकेनेत्युक्त्वाय
देवासस्त्वेचापतिष्ठेत।अथपित्र्यपात्रेशुतिलास्सकुशांदित्वापात्रेपर्युक्ष्यपृथिवीतेपात्रमित्यादिमंत्राइ
दंविष्णुरस्त्वाविश्लोकव्यंरत्नस्वेत्यंगुष्ठंनिवेश्यपितादेवतापितरोवादेवताइदमन्नंहविरित्याद्युक्त्वापित्र
वसुरूपायपितृभ्योवसुरूपेभ्यइतिवोक्त्वाइदमन्नंपरिविष्टंपरिवेष्यमाणंचातृप्तेरन्नंममपितामहायरु
द्ररूपायप्रपितामहायादित्यरूपायपितामहेभ्योरुद्ररूपेभ्यःप्रपितामहेभ्यआदित्यरूपेभ्यइतिवातिलो
दकेनेत्युक्त्वायेवहपितरस्त्वेचोपतिष्ठेत।नात्रोहःकार्यः।मातामहेष्वप्येवं।अतिथिरस्मिवैत्रेदेववद
र्चयित्वास्वेष्टदेवतारूपायविष्णुरूपायशिवरूपायसूर्यरूपायचेत्यन्नेनत्युक्त्वायेदेवासःसप्तपृच्छायदे
वतात्पश्चसप्तद्यावादशारापज्ञ्यादाजस्वापोशानंदत्वाप्राणावगायत्रीमधुमतीरुक्त्वाक्षितिविरु
क्त्वार्थंतत्सहितिपथास्खंजुषध्वंब्रूयात्।अथब्राह्मणाःप्राणाहुतिहुर्वमौनिनोश्नन्नात्पात्रमनुयस्नो

मुखश्राद्धपाणिपाणिस्वापल्लंपवर्जयंतोभुंजीरन्नायद्याद्दादिपालिंसालिंडिकाधुवाध्याणाकुत्पाइर्वस्हर्वापात्रेनि
धायभुंजीरन्॥उच्छिष्टसेकपादरजःस्पर्शाक्रमणादिलयात्सर्वथानयंविकादित्रिपादिभनिदध्यात्॥नवलि
उर्डी॥ततोलोकैकर्तृत्रेनयज्ञेवतेहविस्त्रयेयांश्रात्रेरहोमंपित्र्यापवित्र्यामंत्रान्त्राणवादिह्र्वीउपवीती
श्रावाधित्वाश्रणवगायश्रौजपेत्॥ततःसार्ववर्णिकमन्नाद्यमादायब्राह्मणस्वार्यप्राचीनावीतीमधुवाता
त्र्यंअलन्नमीमदन्तेत्यंवश्रावयित्वात्स्माःस्येतिष्टस्यात्स्माःस्मशतितेवसुनेदेवपित्र्यवाह्मणस
न्निधौभुरतात्छिष्टसमीपेदाक्षिणाग्रेषुदर्भेषुतिलोदकंपितृतीर्थेनप्रसिच्ययेअग्निदग्धाश्यपनेनसंति
लमनंत्रिस्वातिलोदकंप्रसिच्यावामेत॥ततोधृश्वंदत्वासार्ववर्णमन्नाद्यंपिंडार्थमुद्धृत्यान्नशेषाःकिंकु
यतामितिष्टस्यारष्टैःसहोपभुज्यतामित्यनुज्ञातेनैर्गृहीतेवाल्याग्निहोमेअग्निसमीपेपाणिहोमेविप्रसमी
पेपिंडपितृयज्ञवत्पिंडान्दद्यात्॥तद्वैवंगोमयेनोलिप्तेस्त्रप्रदेशेस्फेनखादिरेणकाष्ठेनवादर्भेणवा
अपहताअसुराइत्यादिनालेखांकृत्वायंप्रागपवर्गंदुरवाम्भ्युत्पतत्रवर्हिरास्तीर्यपाश्चिमलेखायांपिंडदे

शेषं शुंधंतां पितर इत्यादिभिस्त्रिभिः मंत्रैः तिलोदकं पितृतीर्थेन निनीय पूर्ववल्लेखायां शुंधंतां मातामहा इत्यादिभिः
र्निनीय एतत्ते देवदत्तशर्मन्ये च त्वामत्रानु इत्युक्त्वा एतत्पिंडरूपमन्नं पित्रे नमेत्यादिभिस्त्रिभिस्तिलमिश्रांश्च पराचीनपा
णिः पिंडान्निधाय अत्र पितर इत्यादिना षट्पिंडान्सव्यं देवा उ मंत्र सव्यावृदुदगावृत्य यथाशक्त्यनुच्छ्वसं
न्नासित्वा आसिपर्यावृत्य अमीमदन्त पितर इत्यादिना उष्मं ओद्धसेत् ततः उपवीती पिंडशेषमवघ्राय हस्तं प्रक्षाल्या
चम्य प्राचीनावीती पिंडेषु पूर्ववदुदकं निनीय देवदत्तशर्मन्नभ्यंक्ष्वेति पिंडेषु तैलं दत्वा देवदत्तशर्मन्नंक्ष्वे
त्यंजनं दत्वा एतद्वः पितर इत्यादिना वासो दशामूर्णास्तुकां वा दद्यात् पंचाशद्वर्षोर्ध्वं स्वहस्तरोम वा दद्यात्
तेनैव मंत्रेण ततः पिंडेष्वोक्षितं गंधपुष्पधूपदीपनैवेद्यतांबूलानि दत्वा अथ पिंडान्पितृरूपानुपतिष्ठेत नमो
वः पितर इत्यादिना मनो न्वाहुवामह इति तिसृभिः अथ पिंडानुद्गमयत्वावाहयेत् परेतन पितर इत्येतया अ
ग्ने तमद्येत्यृचा दक्षिणाग्निं प्रतिगच्छेत् यदन्तरिक्षमित्यृचा गार्हपत्यं प्रतिगच्छेत् औपासने त्वग्ने तमद्येति
गत्वा यदन्तरिक्षमिति जपेत् तत्र गार्हपत्यपदस्य लोपः पाणिहोमे त्वग्ने तमद्येत्यादिकं नास्त्येव ततः पिं

स्म॰ आ॰
३६

डेत्योद्धृतं गंधपुष्पधूपदीपवस्त्रतांबूलानि दत्वा वीरं मे दत्त पितर इति मध्यमं पिंडमादायाधत्तेति पत्नीं प्राशयेत्।
पुत्रकुमारारोग्यैश्वर्याय पिंडांस्तु गोजविप्रेभ्यो दद्यात् दमौ जले पि वाग्निं क्षिपेत्। अर्घ्यं निनयनादन्यत्रापि तथा शास्त्रसो
होन कार्यः एवं वा स्वशाखोक्तविधिना पिंडान्निधायावम्याचमनं दद्यात्। ततो विप्रहस्ते पोदत्वा नमस्कृत्वा
यवांजलिं त्वक्रमात् दत्त्वा तान् निरस्य पुनः सादरं तत्पुष्पाणि दत्त्वा गोत्रनाम्ना शिवाद्य गोत्रं वर्द्धतामिति याचि
त्वा अवसिंचं वर्द्धतां गोत्रमिति प्रत्युक्ता पुनर्दत्वा नाशिषो गृहीत्वा पात्राणि चालयित्वा चामेत्। अनुपनीतः स्त्री
वनबालयेत्। ततो विश्वेभ्यो देवेभ्यः पितृभ्यश्च स्वस्तीति ब्रूयात् उक्तो ते उ अस्त्विति प्रत्युक्ते विश्वेषां देवानां
पितृणां वा अक्षय्यमस्त्वित्युक्त्वा अक्षय्यमस्त्विति प्रत्युक्ते शुद्धि रागपरजतादि शक्त्या दक्षिणां दद्यात्। ततो दक्षिणा
पात्रं वक्तु देयं वास्त्विति प्रत्युक्ते तत्तथैव प्रत्यूचुः। स्वधां वाचयिष्य इत्युक्ते वाच्यतामित्यनुज्ञाताः स्वधोच्य
तां इत्युक्ता स्वधेति प्रत्युक्ते भूमौ जलं प्रसिंचेत्। स्वधाः संपद्यंतामित्युक्ते संपद्यंतां स्वधेति प्रत्यूचुः। विश्वे दे
वाः प्रियंतामित्युक्ते प्रियंतां विश्वेदेवा इति प्रत्यूचुः पितरः प्रियंतां इत्युक्ते प्रियंतां पितर इति प्रत्यूचुः। ततो

३६

सुवर्णपात्रे उत्तानं कृत्वा पवित्राणि विसृज्य विप्रहस्ते दत्त्वा उष्णाणि शिष्यावा जे वाजस्य क्तोपतिष्ठेत पितर इति दर्भा
विप्रात् पितृ पूर्वं विसर्जयेत् ॥ ततः पाद प्रक्षालनदेशे आमावाजस्येति प्रदक्षिणी कृत्य दक्षिणामुखो दातारो नो
ति वर्द्धन्तां अन्नं च नो बहु भवेदिति वरं तु याचितेभ्यो ते स्वरत्या यां स्मो कास्त्यां प्रभत आख्यात शब्देन वा तथैवास्त्विति
प्रत्युक्तो आशिषो गृहीत्वा प्रणिपत्य अद्य मे सफलं जन्मेति प्रसाद्य सर्वसंपूर्णमस्त्विति वाचयित्वा तत्प्रतामित्युं
क्त्वा निवेशनांत मनुव्रज्य प्राप्य तामित्युक्तेप्रदक्षिणीकृत्य गात्यपाकान्तरेण वा श्राद्धशेषेण वा वैश्वदेवादिकं
कृत्वा निवेशनांत मनुव्रज्य ... निमंत्रणादिवद्वाक्रोब्रह्मचारी स्यात् ॥ तोत्काउत्तनं तौ जनागम नाध्याप
कृत्वा इष्टैः सह श्राद्धशेषं भुंजीत निमंत्रणादिवद्वाक्रो ब्रह्मचारी स्यात् ... पार्वणश्राद्धं सर्वसंग्रहकारमताल्लिखितं अनुपनीतः
नाध्ययन मैथुन दान प्रतिग्रह होमादीन् वर्जयेदिति पार्वणश्राद्धं सर्वसंग्रहकारमताल्लिखितं अनुपनीतः
स्त्री शूद्राः श्राद्धमत्रि जा कारयेद्वा ॥ स्वयं वा अमंत्रकं नाम गोत्राभ्यां कुर्युः ॥ देवेभ्यो नमः पितृभ्यः स्वधा नमः
इति मंत्राभ्यां वा ॥ पितरो यत्र पूज्यंते तत्र मातामहा अपि अविशेषेण कर्तव्यं विशेषात्नरकं व्रजेत् ॥ एवं काम्यश्रा
द्धं तत्र धुरिरोचनो विश्वेदेवो अग्नौ पाणौ वा होमः ॥ नैमित्तिकश्राद्धं व तद्दत्तात्र कामकालौ विश्वेदेवादृष्ट अ

स्मृ·आ·

द्वंद्वं विश्राद्धं वतद्वता। तत्र क्रतुदक्षौ विश्वेदेवाः॥ ॥अथ वृद्धिश्राद्धं। तत्र सत्यवसू विश्वेदेवाः॥ वैश्वदेवार्थे मात्रा
द्यर्थे सपत्नीकमातामहाद्यर्थं च द्वौ द्वौ विप्रौ युग्मा वा शक्तितो योज्याः॥ अमूल्यदर्भा यज्ञोपवीती प्राङ्मुखेभ्य
उदङ्मुखो दद्यात्। उदङ्मुखेभ्यो वा प्राङ्मुखः॥ सर्वथा न दक्षिणामुखो दद्यात्॥ तिलार्थे यवाः। नांदीदेवे नां
दीश्राद्धे क्षणः क्रियतां। ॐ तथा प्राप्नुतां लवतौ प्राप्नवा चेत्या दक्षिणः पित्र्ये पिंडे कुशस्थाने पवित्रकं। पित्र्ये ना
न्दीमुखपूर्वत्वं वयं वो सि सि सोमदेवत्य इति यवावाप्ये स्वधायां स्थाने पुष्टा। स्वधा नमःस्थाने स्वाहा नमः। शब्द
स्वाहार्घ्या इत्यर्घनिवेदनं। नान्दीमुखाः पितरः प्रीयतामिति वा दधि दूर्वाक्षतादिदेयं प्रदक्षिणमुपचारः॥ उदगप
वर्गान्ते मध्ये पाणौ वा होमः। अग्नये कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहेति न्युत्क्रमेण होमः॥ हो
मवन्मेक्षणप्रक्षेपः॥ रक्षोघ्नमैन्द्रं शान्तिमंत्रानाश्रावयेत्। मधुवाता इत्यस्थाने उपास्मै गायता नर इति पंचर्चं
श्रावयेत्। अथ मधुमंत्रान्। अन्नमीमदन्तेत्यत्र श्रावयेत्। आचान्तेषु भुक्तशेषं पात्रे गोमयेनोपलिप्य॥
प्रागग्रादिसंसक्षीर्ये देवदृषदा यद् दधिबदरमिश्रं भुक्तशेषं एकैकस्य द्वौ द्वौ पिंडौ दद्यात्। आज्ये

२

दक्षिणेप्वदाज्यंशेषंपार्वणवत्॥ अत्रपिंडमात्रस्यलोपोवा॥ अथैकोद्दिष्टं तत्रश्राद्धानित्रिविधानिनव
श्राद्धानिनवमिश्राणिपुराणानीतितत्रप्रथमाहाद्येकादशाहान्तविहितानिनवश्राद्धानिएकादशाहादि
न्यूनाब्दांतंविहितानिनवमिश्राणिततःपरंपुराणानीत्युक्तं तत्रसर्वैकोद्दिष्टेषुदैवंनास्तिएकमर्घ्यःब्राह्मण
श्चैकःअग्न्यभावाविप्रएकंपात्रंपवित्रंचपाणौहोमोनास्तिवाउक्तशेषेणैकःपिंडोदेयः॥पुराणैकोद्दिष्टेपा
र्वणैकदेशवत्सर्वदैवहीनंसमंत्रकमेव॥पाणौमंत्रात्स्वाहोमः॥नवमिश्रेषुदिवानिमंत्रणंनिमंत्रणादि
नस्वाध्यायः पितृशब्दस्थानेप्रेतशब्दवतीमंत्राणांलोपः तिलयवावापादिसर्वंतूष्णीकार्यंतूष्णीमर्घ्यनिवेद
नादावल्पमंत्रांतेनानाम्नैनोद्देशो नार्घ्यदत्वागंधादिदेयंपाणौप्रेतायस्वाहेतिएकाहुतिः नवाक्षय्यंदीपंस्वधा
शब्दंपितृशब्दंपिंडंअक्षय्यशब्दंजपमासिश्रावणंवर्जयेत्॥अत्रार्घ्यस्थानेउपतिष्ठतामितिवदेत्॥प्रतिवचनंच
दत्तंअस्तिरम्यतामितिविसर्जयेत्॥अभिरताःस्मेतिप्रत्युक्तिः॥नवमिश्रेष्वपिसर्वममंत्रकमित्येकेनवश्राद्धे
षुसर्वममंत्रकमेवकार्यंनामप्रेतशब्दंचनलोपयेत्॥सद्यएवनिमंत्रणंअक्षय्यंदीपंश्राद्धशेषप्रश्नोजनंचवर्जयेत्॥

स्मृ॰श्रा॰

३८

नवश्राद्धंकृत्वाश्रापात्।अथतत्सर्वपार्वणवत्।नवश्राद्धात्पेकादशेवाह्निकार्यं।।तत्राद्यमहैकोद्दिष्टंतत्रवस्त्र
दक्षिणाप्रेतवस्त्रालरणयानशय्यासनताजनपादुकोपानहच्छत्रादिकंदेयं।रुद्रगणप्रेतोद्देशपत्त्रेनवश्राद्धव
त्।रुद्रोद्देशपत्त्रेउपवीतीविप्रांसमस्तर्च्यभोजयेत्।रुद्रस्वपप्रेतोद्देशेनामश्राद्धंसोदकुंभंसतिलंसर्व
त्रदक्षिणादेयाप्रेतश्राद्धेविशेषेण।अथसपिंडीकरणं।। ।।तत्रमंडलत्रयंदैवेद्वौविप्रौप्रेतस्थानेत्वेकः
।तात्पित्रादिषुत्रयः।अशक्तौदैवेप्रेतेपित्र्येचैकैकोविप्रः।कालकामौविश्वेदेवार्चनंपूर्ववद्दैवे।प्रेतार्थमे
कपात्रंतात्पित्राद्यर्थंत्रीणिप्रेतेनवामिश्रैकोद्दिष्टवत्।पित्र्येपार्वणवत्।पात्राणिपूरयित्वागंधादिक्षिपे
त्।पात्राणितत्रैवानिवेद्यप्रेतपात्रंपितृपात्रेषुसंयोजयिष्यइतिपृष्ट्वासंयोजयेत्पउज्ञातःप्रेतपात्रं
कुशान्पितृपात्रेषुनिक्षिप्यप्रेतपात्रेकिंचिद्देवजलंसकुशमवशेष्ययेसमानाःसमनसइतिद्वाभ्यांमंत्रा
भ्यांपितृपात्रेषुप्रसिंचेत्।प्रेतपात्रावशेषेणप्रेतायार्घ्यंपितृतत्पात्रार्घ्यंदत्वाछादनांतंकृत्वापृथक्
यगन्नंस्रुतप्रेतायपाणौवैकाहुतिंजुहुयात्।अन्नंचापिअर्थमग्नौपाणौवामंत्रास्त्यांहोमः।हुतशेषंपित्र्य:

३८

पात्रेषु दद्यात्॥ तदन्नं भोजनात्प्राक् नाश्नीयात्। भोजनार्थान्नेन सहाश्नीयात्। प्रेतोद्देशेनैकं पिंडं दत्वा पित्रे
त्रीन्पिंडान्मंत्रतो दत्वा प्रेतपिंडं पितृपिंडेषु संयोजयिष्यामीति दृष्ट्वा संयोजयेत्। तत्र प्रेतपिंडं त्रिधा विभ
ज्य पूर्वमंत्रात्पां पित्रादिपिंडेषु निदध्यात्। अत्र मंत्रणादि सर्वं पार्वणवत् सर्वं तत्रैव समापयेत्। श्राद्धभोजने मिथः स्प
ष्टौ तदन्नमल्पं जग्ध्वा गायत्र्यष्टशतं जपेत्। उच्छिष्टसिक्ते तत्त्वन्नाल्पभुक्त्वा स्नात्वा द्विशतं जपेत्। उच्छिष्टभोजने
सहस्रं जपेत्॥ ॥ मातृणां चैवं तत्र विशेषः। अपुत्राया दुहितायाः सर्ताभ्रमात्रादिभिः सापिंड्यं कुर्यात्। ब्राह्मादिविवा
होत्पन्नपितृगोत्रेण वा कुर्यात्। अथ आरोहणे तु एकचितारोहणे तु एकदिनमरणे स्त्रियाः पृथक् सपिंडीकरणं न
कार्यं। मातृपिंडदानादिकं आसुरादिविवाहोत्पन्नः पुत्रिकापुत्रश्च तत्र पितृगोत्रेणैव कुर्यात्। भर्तृकृते द्वि
याश्च कृतं भवति। दिनान्तरमृतस्तु अपि तु पितृपितामहपिंडमध्ये कुशानन्तर्धाय पित्रे केन मातुः सापिंड्यं कुर्या
त्। सर्वत्र तत्पत्न्याः सापिंड्यमन्ये नैव। आसुरेण निषिद्धं केचित् त्रितिरेव सपिंडनमाहुः। आसुरादिविवाहोत्पन्नः
पुत्रिकापुत्रश्च मातामहादीनि तेषां तथा सति मातामहश्राद्धं नित्यमेव स्यादाहादौ। ब्राह्मादिविवाहोत्पन्न पैत्रेकेन

३८

पितरिस्थिते पितामह्यादिभिर्मातामहादिभिर्वा सपिंडं कुर्यात्। ब्राह्मणादिहतानां पतितानां प्रायश्चित्ताकरणे ब्र
ह्मचारिणामनपत्यानां च सपिंडीकरणं नास्ति। तेषां सदैकोद्दिष्टमेव क्रमष्टनानां व्यवहिते सापिंड्यं कार्यं न वा।
केचित्सर्वत्र सपिंडीकरणमाहुः। संवत्सरादर्वाक् सपिंडीकरणे सति प्रतिदिनं प्रतिमासं वा सोदकुंभं श्राद्धं इष्ट
ताहश्राद्धवत्कृत्वा सपिंडीकरणमारभ्य वा एकादशाहादिषु तान्येव षोडश श्राद्धानि इष्टतावह श्राद्धवत्कृ
त्वा वा संवत्सरादिमो कार्यं पार्वणश्राद्धं स्वरि ब्राह्मणभोजनं च कुर्यात्। इष्टताहश्राद्धं प्रत्यब्दमेकोद्दिष्टं पार्वणं वा
यथास्वाचारं पुत्रैः कार्यं। मरणतुर्योपन्मासे त्वज्ञेयानि तद्दिने तस्य इष्टताहः। पत्नीनां सदा श्रीभिः पार्वणमे
व कार्यं। दर्शष्टतस्य प्रेतपक्षेष्टतस्य च प्रत्यब्दं पार्वणमेव यतीनां त्रिदंडिनां प्रेतत्वं नास्त्येव एकादशेऽह्नि पा
र्वणमेव कार्यं। दंडग्रहणात्पूर्वं मरणे तु शास्त्रोक्तविधिना दग्ध्वा उदकपिंड प्रेतश्राद्ध सापिंड्यादीनि का
र्याण्येव। शूद्राणां तु प्रेतश्राद्धं सर्वं मंत्रवर्जं द्वादशेऽह्नि कार्यं मासे गते न वा कार्यं। अनाहिताग्नेर्मरणाहादि प्रे
तकार्यं इष्टताहश्राद्धं वा। आहिताग्नेः प्रेतकार्यं इष्टताहश्राद्धं तद्दहनादि कार्यं त्रिपक्षान्ते तन्मासार्धं इष्टताह एव सर्वे

३८

षां मृताहे न कुर्यात् श्राद्धं कार्यं अष्टकागयायां च पितॄणां मातॄणां पृथक् श्राद्धं न सपत्नीकं माता मह
दीनां सपत्निकमेव। तत्र दैवतंत्रमेव पितृपूर्ववत् मेव अनेकमातरोप्येकतंत्रेणोत्पाः। अन्यत्र पूर्ववत्। एकोद्दिष्टे च न
सपत्नीकं श्राद्धं पूर्ववत् दैवतंत्रं च व्युत्क्रमेव। मृताहे श्राद्धं पितृमृताहे पितॄणामेव कार्यं न सपत्नीकं मातृमृता
हे मातॄणामेव कार्यं पितॄणां तत्र श्राद्धप्राप्तिरेव नास्ति मातापित्रोर्मृताहे क्यपितृमातृश्राद्धं पृथगेव न स
पत्नीकं तत्र पूर्वं पितृश्राद्धं समाप्य ततो मातृश्राद्धं कुर्यात्। पित्रोर्मृताहे कोस ह ह ह नमातृश्राद्धं पृथगेव।
तत्र तु पितृश्राद्धं मातृश्राद्धं चैककालेनैकपाकेन क्रमेण समापयेत्। मृताहैक्येणकाकवित्पारोहणोस निमा
त्ट श्राद्धं पृथगेव। तत्र दैवतंत्रमेव। तत्र पितरः ततो मातरः अनेकमातरः पृथगेव। क्रमेण कालपाकवर्हिः प्रयो
गैक्यात्तिन्नवित्पारोहणे सर्वं पृथगेव मृताहश्राद्धस्यैकोद्दिष्टत्वेप्येष क्रमः। अष्टकागयामहिमृताहान्य
त्र सपत्नीकं व्यजात्विश्राद्धं मातुलपूर्वाचार्याणां च तद्वत्॥ ॥ अथापरपक्षमहालये सर्वेषां पितॄणां श्रा
द्धं कार्यं तत्र मातृश्राद्धं पृथक् शस्त्रं मातामहानां सपत्नीकमेव। गुर्वाचार्यपितृव्यमातुलश्वशुरोपाध्या

79

पश्चात्सखिप्रियपोषकदत्तपुत्रशिष्यर्त्विगादीनां तत्स्त्रीणां श्राद्धं कार्यं। अपुत्राणां विशेषेण कार्यं। तत्रैकः
पाकः। वैश्वदेवं तत्र पिंडवर्हिश्चैकं पत्रं श्राद्धवत्तथैव। तत्र त्रयोदश्यामेकवर्गस्य श्राद्धं न कार्यं पिंडदानं च
निषिद्धं मघायां गविशेषतः। पुत्रकामस्य च। पिंडवर्हिः कुशाः काशाः दूर्वाः प्रशस्ताः। व्रीहियवगोधूमो
शीरेक्षुकुंदुरुकुंजवल्वजाश्च न भवंति। एकादश्यां त्रयोदश्यां मघायां कृत्तिकासु च। पिंडदाने दूर्वा निषिद्धाः॥
तत्पत्रं वज्रदर्शपौर्णमास्याश्च हतस्यैव श्राद्धं तत्रैकोद्दिष्टमेव। सर्वेषां पापमृतानां चैवं नत्वदैवं पार्वणवत्। नित्य
श्राद्धं अदैवं पक्षुरूषं च न भवति। तत्रान्नकालदेशनियमाः कर्तृलोकनियमाश्च न संति। विप्रानुपवेश्यासनं
दत्वाऽर्घ्यहोमपिंडवर्जं संकल्पसिद्धं तत्कृत्वान्नं तत्पश्चात्क्षुक्तोऽप्रसादयेत्॥ ॥विवाहमौंजीवर्षोर्ध्ववर्षे
वर्षार्द्धकं मातृसापिंडीकरणं वर्जं सर्वश्राद्धेषु सपिंडाः पिंडान्नदद्युः। शिष्टं सकुर्युः॥ पृथक्पिंडानपि न दद्युः
।पितृपक्षे च यज्ञे च गयायां दद्युरेव॥ ॥सपिंडीकरणवर्जं सर्वश्राद्धेषु विस्तृतपार्वणविधानासंभवे संक
ल्पविधानेन कार्यं। संकल्पविधानं नाम आवाहनार्घ्यहोमाः पिंडवर्जं पार्वणोक्तं यथा संभवति॥ ॥

अत्रालाभे द्विजालाभे प्रवासे पुत्रजन्मनि पत्न्यां लाभे अग्निलाभे पाकर्त्तृलाभे सति पत्न्यां रजस्वलायां आपदि ती
र्थग्रहणसन्निधौ लोजननिषेधकाले इष्टताहेवान्य श्राद्धे वसग्रहे संक्रांतौ वा। अवीरा स्त्री शूद्रश्च सर्वदा
मश्राद्धं कुर्यात्। तत्राच्छादनान्नं कृत्वा मंत्रवर्ज्जं तद्द्विगुणं समं वा सोपस्करं तत्रैव दक्षिणां दत्वा समापये
येत्। आमे होमपिंडौ न वा। स्वस्तिवाचनं नास्ति।। ।।अन्नालाभादि निमित्तेषु हेमश्राद्धं वा कार्यं विशेषतः।।
पुत्रजन्मापत्नीकप्रवासानग्नितीर्थोपरागग्रहणेषु हेमश्राद्धे आवाहनार्घ्यगृहपाकहोमपिंडां कुर्युर्न्नवा।
आच्छादनान्नेहिरण्यं अष्टगुणं वर्ज्जं द्विगुणं समं वा सदक्षिणां तत्रैव सर्वं समापयेत्।। ।।अत्राला
भाद्यनेकनिमित्तेषु सत्सु सांकल्पिकश्राद्धं कार्यं। तत्र द्व्यो विप्रे सन्निहिते वा आमहेमवस्त्रवस्त्रधनधान्या
दिवस्तु शक्त्यापितृदेशेन संकल्प्य त्यजेत्। मासिकानि ष्टताहश्च संत्वे वे अन्नेनैव कार्याणि सापिंडीकरणं स
र्वथा अन्नेनैव कार्यं।। ।।अथ श्राद्धकालविधिः।। ।।तत्र तावत् यस्मिन् दिने यद्विहितं कर्म तत्कालव्याप्तिकाभुत
त्कर्मणः प्रारंभं समाप्तिं वा कुर्यात्। इत्याह श्राद्धस्य विशेषेण संस्कारंभं समाप्तिं वा कुर्यात्। अह्नि पंचद

स्मृ॰ श्रा॰
५१

गाधाविलन्ने अष्टमो मुहूर्तः कुतपः कुतपादि पंचमुहूर्तेषु श्राद्धं न सायाह्ने न रात्रौ । नातिप्रातः कार्यं अह
पंचधा विभागे द्वितीयमुहूर्ते कार्यं । प्रातः पूर्वाह्नो मध्याह्नोऽपराह्नः सायाह्न इति । प्रातःकाले हरिदिनिमित्तं श्राद्धं प्र
शस्तं । पूर्वाह्ने आमश्राद्धं हेमश्राद्धं वा मध्याह्ने एकोद्दिष्टं अपराह्ने पार्वणं पिंडपितृयज्ञकरणादि नेसा
याह्ने पिपार्वणो न ज्ञायते । एवं दर्शादिनेषु ॥ ॥ अथ षंडतिथिः शुद्धातो अमावास्या द्वेधा सिनीवालि
संज्ञा नष्टचंद्रा कुहूसंज्ञा । अमावास्या भूतविद्धा न वेद पराह्णव्यापिनी ग्राह्या । भूतविद्धा चेत्तोत्तरा तत्काप
रेद्युरपराह्णव्यापिनी तिथिर्ग्राह्या मध्याह्नात परस्तादमावास्याप्रतीतौ भूतविद्धा भवति । अतस्तत्र तिथिद्वय
विषये अपरेद्युरपराह्ने अमावास्याया असत्त्वे भूतविद्धापि सिनीवाली सायाह्नव्यापिनी ग्राह्या । ततो वीची
न दर्शेपि भूतविद्धा सिनीवली अपराह्णव्यापिनी सर्वैर्ग्राह्या । यद्वा साग्निकैः सिनीवाली निरग्निकैः कुहूश्च
द्वेधा कुहूः । अतस्तत्तिथिद्वैधे चतुर्दशी भूतविद्धा सिनीवाली तत्काऽपराह्णव्यापिनी कुहूर्ग्राह्या । ततो वीचीन
दृष्टे भूतविद्धा सिनिवाली तत्काल मध्याह्नव्यापिनी कुहूर्ग्राह्या । द्वयोरपि मध्याह्नव्यापित्वे तिथिसाम्ये

५१

ष्टया ग्रतराति थिर्ग्राह्या। यद्वा साग्निकैः सिनीवाली। निरग्निकैः कुहूः श्राद्धे ग्राह्या। यद्वा सर्वैः कुहूर्ग्राह्या। दर
र्शपौर्णमासयोः श्राद्धतिथित्वं वृद्धिश्राद्धसंकोचेनेत्यलं॥ ॥ एतद्दिने पराह्णव्यापित्वे च तिथिर्ग्राह्या॥ परा
ह्णपित्रर्णां स्वयं भवादित्वं नाम्नमयात्रिमुहूर्त्तमात्रव्यापित्वे वा तिथिर्द्वैपरैव ग्राह्या। तिथिसाम्ये तु परा पूर्वा वा
तिथिद्वयेत्वसमप्र त्रिमुहूर्त्तव्यापिन्येव ग्राह्या। अपरदिने श्राद्धकरणासंभवे सूतकादिविघ्नसंभवे वा पूर्वैव
क्षणमात्रव्यापिनी ग्राह्या। केचित्सदा पूर्वविद्धा ग्राह्येत्याहुः। तत्र बहुस्मृतिन्यायविरोधे नेच्छंति। पूर्वदिने श्रा
द्धकरणासंभवे च परैवोदयव्यापिनी सूक्ष्मगपर्याप्तकाला तिथिर्ग्राह्या। तत्रापि मृताहश्राद्धस्य द्वयासंभवे
नान्येन विघ्नेन वा अनुपपन्नो ग्रहयत्नानंतरं कार्यः सूतकादिविघ्ने च शुद्ध्यानंतरं कार्यः। यद्वा कृष्णैकादश्याममा
वास्यायां वा कार्यं। यद्वानंतरमासे तद्दिने कार्यं। एकोद्दिष्टे संप्राप्ते विघ्ने सत्यनंतरमासे तद्दिने कार्यं तत्रादीनेनषो
डशश्राद्धानि कार्याणि। अनुपपन्ने निमित्ते विघ्ने सति उपपत्त्यनंतरं सर्वाणि उपर्ययिमासिकश्राद्धविघ्नेनंत
रमासि तद्दिने कार्यं॥ ॥ प्रोषितमरणे मृताहाज्ञाने मृतमासपरिज्ञाने सति तन्मास दर्शो ग्राह्यः। मृतमासाज्ञाने

स्मृ॰श्रा॰
४२

ताऽष्टताहपरिज्ञाने सति मार्गशिरे मासे भाद्रपदे माघे वा तद्दिनं ग्राह्यं मरणदिनमासौ न विज्ञातौ चेत् प्रस्थान
प्रवासदिनमासौ पूर्ववद्ग्राह्यौ। प्रस्थानप्रवासदिनमासौ न विज्ञौ चेत् मरणवार्त्ताश्रवणदिनमासौ पूर्ववद्ग्रा
ह्यौ॥ मरणवार्त्ताश्रवणदिनमासौ न विज्ञातौ चेत् पुनर्दहनदिनमासौ पूर्ववद्ग्राह्यौ। यदा सर्वं नापि कृष्णपक्ष
स्मरणो दर्शो ग्राह्यः। शुक्लपक्षस्मरणे पूर्णमासः। सर्वाष्टताहाने माघमासस्य दर्शो ग्राह्यः। अपि पितृस्यापि सर्वा
त्मना मरणदिनमासाज्ञाने एवमेव ग्राह्यः॥ ॥युगादिमन्वादितिथितिथिविशेषविहितश्राद्धे तु शुक्लप
क्षे उदयव्यापिनी तिथिर्ग्राह्या॥ कृष्णपक्षे समनव्यापिनी तु कृष्णपक्षस्य पूर्वाह्णे करणं प्रशस्तं॥ ॥कृष्णपक्षस्यापि
राह्णे न तत्र विहितश्राद्धेष्वपि शुक्लपक्षे उदयव्यापिन तत्र दिनं ग्राह्यं। कृष्णपक्षे समयव्यापिन तत्रा दिनं
॥ ॥अथ संक्रान्तिरुच्यते॥ ॥संक्रान्तिसर्वत्रोभयतः षोडशघटिकाः पुण्याः अष्टाष्टघटिका तु इष्टफले॥
अदृष्ट उच्यते तेन तु कर्कटसंक्रमो दक्षिणायनं। दक्षिणायने पूर्वं त्रिंशघटिकास्नानदानश्राद्धादिषु पु
ण्याः॥ ॥अथ विषुपदेषु च पूर्वं षोडशघटिकाः पुण्याः॥ वृषवृश्चिककुंभसिंहसंक्रमा विष्णुपदाः। तुला

४२

मेषयोर्विषुवसंक्रमौ॥ तत्र पूर्वं दशघटिकाः पश्चाच्च दशघटिकाः॥ पुण्याः षडशीतिमुखेषु पश्चात् षोडश घटिका
पुण्याः॥ मिथुनकन्याधनुर्मीनसंक्रमाः षडशीतिमुखाः॥ मकरसंक्रमणमुत्तरायणम्॥ उत्तरायणे पश्चाच्चत्वारिंश
द्घटिकाः पुण्याः॥ अर्द्धरात्रादर्वाक् संक्रमणे पूर्वमतस्तत्पूर्वदिने पुण्यं तत्र स्नानं कार्यं॥ ॥ अर्द्धरात्रादूर्द्ध्वं संक्र
मणे पूर्वमतस्तु परदिने पुण्यं तत्र स्नानं कार्यं। अर्द्धरात्रे संक्रमणे पूर्वमतस्तद्दिनद्वयं महापुण्यं तत्र स्नानं कार्यं।
। यहाग्रहणसंक्रान्तिविवाहो त्सवादि द्विरात्रावपि स्नानादिकं कार्यं। व्यतिपातादियोगः कृतपादिका
लयोगी ग्राह्याः विष्ण्वादिकरणे तथैव॥ ॥ इत्यादि स्मृत्यर्थसारे आद्यतिथिनिर्णयः॥ ॥ अथ पर्वनिर्णय उच्यते
। पर्वणि संपूर्णे पर्वणि पत्न्याधाने प्रतिपदियागः॥ ॥ खंडपर्वणि विशेष उच्यते॥ ॥ पूर्णमासीन्दुर्न चंद्रान्तु मतिः
पूर्णचंद्रा राकेति द्विधा॥ अमावास्या दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूरिति द्विधा प्रधानकर्मतिथेस्तु
त्रुरतिथौ वृद्धिह्रासयोरूर्ध्वं श्ववृत्तिथौ प्रतिपत्काले विज्ञेयाः सूर्यष्यावर्त्तनान्तरं हि आवर्त्तने वा पर्वप्रतिप
त्संधौ सति तस्मिन्नहनि यागः॥ आवर्त्तनादूर्ध्वं संधौ परेऽहनि यागः पर्वणो पश्चाद्यथेष्टः प्रतिपदश्च घ्याज्ञ्य

शाग्यु[illegible]काल: [illegible]योगी। अपराह्णे संयोगे सति परेह्नि प्रतिपच्चतुर्थांशेपि यागकाल: [illegible] संयोगे तु
त्राह्णो द्विधा विभागः पूर्वाह्णे पूर्वद्वये समानं पौर्णमास्यां विशेषो वक्ष्यते। आवर्तनात्पूर्वं संयोगे तु [illegible] कालो नपा
आवर्तनात्पूर्वं संगवादूर्ध्वं पर्वसंयोगे तु सद्यः काल एव। सर्वं पौर्णमासीयजनीयदिने पर्वणि वा सद्यः काल:
केचिदाहुः [illegible] सद्यः कालत्वं कदाचिदपि नास्ति विकृतावेवतदिति केचित्। [illegible] मयं
[illegible] अहः स्वल्पं तद्दीर्घं [illegible] तिथिक्षये सति उदय समीपे पर्वचतुर्थांशे यागो वापि पूर्वाह्णे पर्वसंधिश्चेत्।
तत्रापि तदैव पूर्वाह्णे संधिदिने यागो वा [illegible] नाल्पत्वात्तत्र परेह्नि यागः। अमावास्यायां तु अपराह्णादि पर्वसंयो
गे सति परेह्नि दृष्टचंद्रेपि यागः कार्यः। पूर्वाह्णे संयोगे सति प्रतिपत्क्षये चंद्रदर्शनाद्यसंभवात् [illegible]
ति [illegible] विभाग [illegible] दानं प्रायश्चित्तं प्राच्यां [illegible] दर्शे [illegible] तिरीयो [illegible] दिते [illegible]
[illegible] तिवी। [illegible] ति वी। प्रतीच्यां [illegible] चाथ [illegible] सति परेह्नि [illegible]
कार्या। तत्राग्निः पाथिकृदष्टाकपालः। [illegible] अग्निर्वैश्वानरे [illegible] कपालः। [illegible]

५३

चतुर्दशीनिर्णीः॥ एषा वाजसनेयोक्ता॥ पक्षांतरे च वाउना कार्या॥ मनस्वत्याज्याकृतिर्वा॥ याहृत्याज्याकृतिर्वाहिनस्य
येयातयमाकाले सत्यपि पूर्वाह्णसंधिदिन एव यातयामाः॥ सर्वथा संधिरेव यागोत्कर्षापकर्षप्रयोजकः॥ तिथि
वृद्धिक्षयौ न प्रयोजकौ॥ सप्तदशीतिथिरेवा यागेनेनिषिध्यते॥ नयागेष्ठारंभप्रकृतीष्टेर्विकृतीष्टयस्तुः सद्य
स्कालाः॥ आवर्तनात्पुरा संधौ प्रकृतिं समाप्य विकृतिः कार्या॥ ऊर्ध्वं संधौ विकृतिं समाप्य प्रकृतेष्टारंभः॥ आ
ग्रयणां पर्वकालेष्वयुक्तपक्षे देवनक्षत्रे कार्या॥ कृत्तिकादिविशाखांते॥ प्राच्यां चंद्रदर्शने पिंडपितृयज्ञकालः॥
इत्यादि स्मृत्यर्थसारे पर्वनिर्णयः॥ ॥ अथैकादशीनिर्णयः॥ ॥ एकादश्यामुपवासः कार्यः॥ सवत्रुज्ज्वतां गृ
हिणां तु शुक्लैकादश्यामेव न कृष्णैकादश्यां॥ कृष्णैकादश्यामनशनमयाचितं नक्तमेकभक्तं वा शाकमा
हारं॥ सर्वथा न निर्जलादशीकालवेला उपवासः॥ अशक्तश्चैवं कुर्यात्॥ पुत्ररहितानां गृहिणां यतिवनस्थब्रह्म
चारिस्नातकविधवानां तु उभयैकादश्यां नित्याः॥ घरस्थेदिशु सायुज्यप्रियमासः॥ कृष्णाशुक्ले॥ एकादश्यां न
भुंजीत पक्षयोरुभयोरपीति॥ वैष्णवव्रतत्वेनोपवासस्तांकाम्यानां निषिद्धः॥ एकादश्यां श्राद्धे कृते श्राद्धशेषमाघ्रा

87

स्मृ॰ श्रा॰
४४

योपवसेत्॥ आदित्यवारसंक्रान्त्यादिषु एकादश्युपवासस्य निषेधो नास्ति॥ महापातकमहोत्सवेषु वा सूतके
जाते वशक्तो वनस्थो ज्येष्ठा दशमी व्रते॥ तत्र नित्ये स्नात्वा देवार्चनरहितमुपवासं कुर्यात्॥ काम्ये स्नात्वा प
त्नीपतिपुत्रं भ्रातरं भगिनी ऋत्विजं अन्यं वा अर्चनादिकारयेत्॥ सूतकार्त्तं वा ते दानं न कुर्यात्॥ मध्ये वेत्प
तिः पत्नी वा दानं कुर्यात्॥ सपत्न्योपि परस्परं कुर्युः॥ अन्यव्रतेष्वप्येवं एकादश्याः पूर्वोत्तरदिनयोरेकभ
क्तं चरेत्॥ कांस्यं मांसं मसूरं अतिप्रशनमतिव्यायामं ष्ठीवनं द्वितीयभोजनं मैथुनं च पूर्वदिने वर्जयेत्॥ अथ समाहित
एकादश्यां प्रातःस्नात्वा संकल्पं कुर्यात्॥ एकादश्यां निराहारः स्थित्वाहनि परेत्यहं। भोक्ष्यामि पुंड
रीकाक्ष शरणं मे भवाच्युतेति संकल्प्य दिवा स्वापमैथुनतांबूलादिलवणास्कफालपानसर्वभो
गान् त्यक्त्वा सूतिकापतितपाषंडिहीनजातिसंलापणं च वर्जयेत्॥ भापरतात्री॥ धुष्मा लेका
रव अलिंगायच्छपानुलेपनं॥ उपवासेन दुष्यंति दंतधावनमंजनं॥ वाग्यमलोपे वैष्णवमंत्रान् जपेत्॥
विष्णुं संस्मरेद्वा मनो वाकायनियमलोपे शारीरशारीरमंत्तःकरणोपघातं शत्याद्यो जपेत्॥ विष्णुं शुक्ल॰

४४

संपूज्य पुरतो जागरं निद्रां वा कुर्यात्॥ शंखे चोद्धृत्य पुनः संपूज्य अज्ञानतिमिरांधस्य व्रतेनानेन केशव प्रसीद
सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ॥ तिलवापं रणं कुर्यात्॥ कांस्यं मांसं क्षौद्रं लोभमसत्यं तैलं तिलपिष्टं व्या
याममंजनं च पुनर्भोजनं मध्वागमनं मायासं दिवानिद्रां मैथुनं च वर्जयेत्॥ उपवासफलं शक्तिं च हन्तुः॥
एकादशी शुद्धा संपूर्णा द्वादश्यां नास्ति द्वादशी च समाप्तनाधिका वा तदा एकादश्यामुपवासः॥ यदा संपूर्णैका
दशी द्वादश्यां च किंचिन्मात्रास्ति द्वादशी च त्रयोदश्यां नास्ति तदा द्वितीयैव सर्वैरुपोष्या॥ यदा संपूर्णैकाद
शी द्वादश्यां च किंचिन्मात्रास्ति तत्र रात्रिशेषे त्रयोदशी तदा गृहस्थैः पूर्वोपोष्या तदुत्तरा यतिभिः॥ यदा द
शमीविद्धैकादशी द्वादश्यां च किंचिन्मात्रा विद्यते॥ द्वादशी च त्रयोदश्यां नास्ति वा न वा तदा सर्वैर्द्वितीयैवोपो
ष्या॥ यदा दशमीविद्धैकादशी द्वादश्यां च किंचिन्मात्रास्ति तत्र रात्रिशेषे त्रयोदशी तदा दिनद्वये पि पुण्या द्वि
तीयैवोपोष्या यतिभिः॥ नरहस्थैः प्रजार्थिभिः॥ गृहस्थैस्तु पूर्वैवोपोष्या॥ यदा दशमीविद्धैकादशी द्वादश्यां च न
स्ति द्वादशी त्रयोदश्यां नास्ति तदा द्वादश्यामेवोपोष्या॥ यदा च दशमीविद्धैकादशी द्वादशी च समाप्तनावा तन

स्मृ·अ·
४५

दायतिव्यतिरिक्तानांदशमीविद्धैकादश्याउपवासः।यतीनांतुशुद्धद्वादश्यामुपवासः।यदाचदशमीवि
द्धैकादशीरात्रिशेषेचद्वादशीत्रयोदश्यांचास्तिसमान्तुनावा।तदासर्वेषांदशमीविद्धैकादश्यामुपवा
सः।एतदेकादशीव्रतंमाहेश्वरमपिलवति।।लैंगपुराणेदृष्टा।अष्टमीचतुर्दश्योर्नक्तंचकार्यमेक
तक्तंवा।तत्स्वरूपेणसंकल्पःपारणंच।नान्नावा।तदेकादश्यादिव्रतसौरमपिलवति।।सौरपुराणेच।
नित्यंतुसर्वंसमानमेव।तत्रायंविशेषःषष्ठ्यामुपवासश्चकार्यः।आदित्यवारेएकभक्तंचकार्यं।सावि
त्यानाम्नावासंकल्प्यः।। ।।इत्यादिस्मृत्यर्थसारेएकादशीनिर्णयः।।।।अथतिथ्यन्तरनिर्णयः।एकादश्य
ष्टमीषष्ठीपौर्णमासीचतुर्दशी।अमावास्यातृतीयाचउपवासव्रतादिषुपरविद्धाःग्राह्याः।शेषाः
पूर्वविद्धाऽकार्याऽकृष्णपक्षेऽष्टमीचतुर्दशीचपूर्वविद्धाःप्रशस्ताः।तृतीयानवमीचैवतथैवैतेकेस
र्वव्रतदानादीनांकृष्णपक्षाच्छुक्लपक्षोविशिष्यते।अपराह्णाच्चपूर्वाह्णोविशिष्यतेतदसंभवेउद
यादिमुहूर्तगात्र्यंउपवासेघटिकैकापिग्राह्या।अविद्धानामलालेतुपयोदधिघृतानिरासकृद्वाल्प

४५

मध्याह्नायाद्युपवासस्त्रतोलवेतारएकादशीत्रपंचमुहूर्ताविद्धाग्रुपोष्यैवतदर्वविद्धान्यानिदिनानिप्रदोष
व्यापिनीग्राह्यातिथिर्नक्तव्रतेसदा। उपवासस्तुसंयोगस्थानीयंनक्तंचउपवासतिथौकार्या। तिथिनक्षत्रसं
योगाविहितव्रतेवप्रदोषव्यापिनीतिथिर्ग्राह्या। नक्षत्रविहितव्रतेअर्द्धरात्रादर्वाङ्नक्षत्रव्यापिनीतिथिर्
ग्राह्या। नक्षत्रसंयोगेनयाति: उपानस्याविहितव्रतेसेवातिथिर्ग्राह्या। श्रवणद्वादशीव्रतेतदस्यव्यापिनी
श्रवणाद्वादशीग्राह्या। अत्रएकादशीद्वादशीरात्रिशेषेचत्रयोदशी। द्वादशीहंतित्रयोदश्यांतुपारणं
सर्वत्रतिथिनक्षत्रांतेपारणंनियमाश्रुर्वमेवोक्ता: संक्रांत्यांरविवारेग्रहणेव्यतीपातेकृष्णैकादश्यांच
पारणंचोपवासंचनकुर्यात्पुत्रवान्गृहीतिसंक्रांत्यादिषुभुक्तस्यार्थनिषेधोनान्यप्रयुक्तस्य॥ ॥
इत्यादिस्मृत्यर्थसारेतिथिनिर्णय:॥ ॥अथमलमासेकार्याकार्यनिर्णयउच्यते। सूर्यसंक्रांतिरहि
तोमास: मलमास:। तत्रमलमासेअनन्यगतिकमकरणेप्रातित्यापादकंनित्यंनैमित्तिकंचकर्मकु
र्यात्। तत्रनित्यंस्नानसंध्योपासनाग्निकार्यचमहायज्ञातिथिपूजाग्निहोत्रोपासनहोमदर्शपूर्णमास

९१

४६

पार्वणेष्टिपार्वणस्थालीपाकपिंडपितृयज्ञामावास्यापार्वणश्राद्धमासिकश्राद्धदेवतार्चननित्यदाना
दिकंनित्यंमलमासेपिकार्यमनन्यगतिकंनित्यं।नित्यमन्यगतिकंसोमयागपशुगंधाग्रयणचा
तुर्मास्यादिकंमलमासेनकार्यं।महालयाष्टकाकर्मोपाकर्मोत्सर्जनश्रवणाकर्माश्वयुजीप्रत्य
वरोहणायमघस्त्रादिकंयत्कर्मकृतमासत्रयुक्त्याविहितंमलमासेनकार्यंकत्तरेमासिकार्यमेव।
नैमित्तिकंचगर्भनिमित्तंगर्भमासक्ताविहितंपुंसवनानवलोलनसीमंतजातकर्मादिकंतंनिमित्ता
श्रुदयिकंदानादिकंचचंद्रसूर्यग्रहस्नानतर्पणश्राद्धदानादिकंचमाघत्रयोदशीश्राद्धंचतीर्थस्ना
नजपतर्पणश्राद्धपिंडदानयवव्रीहितिलहोमंमरणकालशुद्धापाकदहनोदकपिंडदानाद्यश्राद्ध
नवश्राद्धषोडशश्राद्धानिप्रेतत्वविमोकार्थान्यन्यान्यपिसपिंडीकरणादीनिनैमित्तिकानन्यगति
कत्वेनमलमासेप्राप्तेकार्याणि।ततःसंवत्सरविमोक्षांतमनुमासिकानिकुर्वन्मलमासेनैवकुर्या
त्।उत्तरत्रकुर्यादितिदेवसंवत्सरांतेसपिंडीकरणांसंवत्सरविमोक्षंचयथाकालंमासिकानिकुर्व

४६

न्नपि मलमासे नैव कुर्यात्। उत्तरत्र कुर्यादेव। मलमासमृतानां प्रत्याब्दिकं श्राद्धं मलमासेपि कार्यं। अन्ये
षा उत्तरमास्येव कार्यं। गर्गे वार्द्धुषिके तुल्ये वाधिकमासं न वर्जयेत्। अवषट्कारहोमाः नित्यनैमित्तप्रवृत्त
काम्यार्थाः प्रायश्चित्तेष्टिः स्थालीपाकहोमाद्या मलमासेपि कार्याः। नैमित्तिक्यपि जातेष्टिर्मलमासे
न कार्या। उत्तरे पर्वणि कार्या। आधानानन्तरमन्वारंभणीयेष्टिं वा स्थालीपाकं च मलमासे न कुर्यात्। काम्यं
यागहोमादिकं मलमासे न कार्यं। मलमासादर्वाक्प्रवृत्तं काम्यकर्म मलमासे आगते न त्याज्यं कार्यमेव। पुराण
धान्यालाभेन निर्वाहालाभे मलमासेपि श्यामाकैराग्रयणमात्रं कृत्वा नवं भुक्त्वा यथाकालं व्रीह्याग्रयणं
कुर्यात्। वसंतोत्पादनः प्रागेव सोमयागो न छोत्रा वेष्टिष्टिपर्वकमेव तत्र मलदूषितं चेत्तत्र नित्योपि सोमया
गो न कार्यः। तत्र लोपणवपत्नीरजोदर्शनवत्॥ ॥इत्यादिस्मृत्यर्थसारे मलमासनिर्णयः॥ ॥अथ लग्ना
लग्नविधिः॥ ॥संस्कारदुष्टं क्रियादुष्टं खलावदुष्टं नाद्यात्। संस्कारदुष्टं वैश्वदेवादिरहितं क्रिया
दुष्टमेकपंक्तौ वयथाग्रं श्वखलावदुष्टं लशुनादिकलिंगकावकर्कटीकवृन्तालाबुवन्यकंटकिकुडंल

रक्तशिग्रुकोविदारश्लेष्मातकनालिकाकुंभश्वेतकंटकिवृंताकानिडुर्गाग्रिकंदमूलफलादिवर्जयेत्॥ यति
व्रतिनोः सुदालाबुशिग्रुवृंताकानि जातिमात्रेणैव वर्ज्यानि शिरःकपालमात्राणि नखचर्मांति नालिकमा
दष्टम्यादिषु वर्ज्यानि सगोत्रालर्चुरनेकारुकान्नं वस्त्रेणपाणिनावधूमवघ्रातमवज्ञातमित्यादिप्राय
श्चित्तविधानतः संवदते॥ ॥इत्यादिस्मृत्यर्थसारेलवदानत्वविधिः॥ ॥अथ भोजनविधिः॥ ॥कृतक
ल्पः पादौप्रक्षाल्य बहिःद्विराचम्यप्राङ्मुखउदङ्मुखोवायज्ञोपवीती सोत्तरवासाविलवेरत्नहिरण्यपाणिः
गंधाक्षतमाल्यवान्त्स्रुविप्रशस्तश्रीपार्णादिश्लक्ष्णचतुःपादपीठेसुखासीनोभूमौपादौप्रतिष्ठाप्यांतर्जा
नुकरोवाथनसावित्रत्वंडरस्त्रगोमयमंडलेसपर्यंतेविप्रोदीपसंनिधौभुंजीत त्रिकोणेमंडलेक्षत्रः वर्तुलेवै
श्यः अभ्युक्षितेशूद्रोभुंजीत। तत्रमंडलेपालिकायांचिकादौशुद्धपात्रंनिधायप्रक्षाल्यपंचयज्ञावशिष्टम
न्नंसुसंस्कृतंघृताद्युपस्कृतमात्मतोयादिद्त्तमतिथ्यल्पागतभृत्यपुत्रादिहृतमेकान्नेभुंजीततत्रन्नमकृत्स
यह्नाब्रह्मयांथिगृहीतपवित्रदक्षिणपाणिर्गायत्र्याभ्युक्ष्यदत्तं ॐभूरित्यादिदशप्रणवमंत्रेणाभिमंत्र्यप्रमाय

नमः चित्रगुप्ताय नमः सर्वभूतेभ्यो नमः इति तेभ्यो बलिं दत्वा हस्तपादवदनार्द्रः करमध्येनान्नमलंघयन् सत्यं त्वर्तेने
ति प्रदक्षिणं परिषिच्यामृतोपस्तरणमसीत्यपोशानं गृहीत्वा सर्वांगुलिभिः सर्वान्नग्रासान्ग्रसन् प्राणायापानाय
व्यानायोदानाय समानायेति स्वाहान्तैः पंचाहुतीः सप्ताहुतीर्वा सघृताः सक्षीरा वा हुत्वा वा क्वाणिपात्रस्यापल्यं
वर्जयन्नक्ष - ग्रासत्रांगुष्ठं ग्रसन् भुक्त्वा अमृतापिधानमसीति गण्डूषमर्द्धं पीत्वा अर्द्धं भूमौ बहिः पाणिर्न्नी
वर्जयन् ... यपविंत्रं विप्रस्य भूमौ पात्रे वा निक्षिप्य सम्यगुच्छिष्टं प्रक्षाल्य द्विराचामेत् नाजालेनापिवेत् नापि स्थितो येन तोयं गोप
यं स्तन्मयं वा स्वर्णपालाशपात्रे ... केनलिन्नमयो वहंपीठं वर्जयेत् ततो हस्तौ संमृज्य पारिप्ला व्याङ्गुष्ठेन व
त्रुयो निधिपित्वाक्षिणां स्पृष्ट्वा भिक्षुपस्पृश्येष्टदेवतां स्मरेत् भोजनगृहे वा सनष्ठो वा नाचामेत् ताम्रे पाखु
वर्णाश्रमवर्जं भिन्नलाननं वर्जयेत् न शुष्कपाणि पादो भुंजीत न तिष्ठन् गच्छन् प्रक्षोन शयानो न शयने
न खट्वायां न संध्यायां शयनादिस्थो न तत्र भाजनं निधाय न जानुनि नोत्संगे वामपाणितले निधाय न भुंजी
त नशि श्रुतिः सहभुंजीत न पश्यता मप्रदाय नाग्निजडबालवृद्धाक्रोशस्य प्रदायनाग्निविप्रेभ्यो प्रदीपन वार्य

४८

यासहाश्नीयात्। विवाहवर्जनाईवस्त्रोनवस्त्रादिपर्यंकिंकांकृत्वानप्रौढपादोनासनारूढपादोनविदिक्षु
खोनदुष्टपंक्तौजलतृणाग्नितस्मपथिसंलेपंक्तिर्लिह्यते। ग्रहणेनाश्नीयात्तदाभानतर्पणश्राद्धदानादिकृत्वा
मोक्षस्नानंकृत्वाश्नीयात्। सूर्यग्रहेपूर्वंचतुर्यामंनाद्यात्। चंद्रग्रहेत्रियामंनाद्यात्। अर्केन्द्वोरस्तंगतयोर्दृष्ट्वास्नात्वा
परेह्न्यद्यात्। नसंध्ययोर्नार्द्धरात्रेनाग्निपाकशून्यगृहेषुनायज्ञोपवीतीनवामहस्तेननशयनेनपाणिपृष्ठेनकेव
लपाणितलेनवस्त्रेभुंजीतनाल्पसहायंत्रिकादौयतिव्रतीब्रह्मचारिविधवाभुंजीतत्यादिसर्वंज्ञेयं॥ ॥अथ
कालेसायंसंध्यामुपास्यहोमंवैश्वदेवमातिथ्यर्चनंकृत्वाष्टत्पोपरिष्टात्लघुभुक्त्वास्वपेत्। स्त्रियासहसाधा
नुलेपनमाल्यतांबूलादिसेवमानःस्वपेत्। नसंध्यायांशून्यालयेश्मशानएकवृक्षेचतुष्पथेशिवमातृका
यक्षनागस्कंदभैरवादिगृहदेवगृहेषुकूलेवनस्वपेत्। यथायोगोदेवविप्राग्निगुरूणांचोपरिचापशुचौअशुचि
रार्द्रवस्त्रपादोननग्नःस्वपेत्। प्राक्शिरादक्षिणशिराइष्टदेवंतंनत्वास्मरत्। वैणवंदंडंशयनसमीपेनिधा
यस्वपेत्। प्रक्षालितपादः। कृतरक्षाःस्वपेत्। प्रदोषपश्चिमौयामौविद्ययानयेत्॥ ॥इत्यादिस्मृत्यर्थसारेआह्निकं।

४८

समाप्तम्॥ ॥अथद्रव्यशुद्धिरुच्यते॥ ॥तत्रविण्मूत्रशुक्ररजोवसामज्जास्थिगर्भमद्यान्यत्पन्तोपहतिकारणानिवि
ड्वराहविडालादिपुरीषादीनिचकर्णविणाखश्लेष्माश्रुदूषिकास्वेदादीनिअल्पोपहतिकारणानि॥ तथाच
छिष्टशूद्रेणसूतिकाभिःद्विजैस्पृष्टकाकादिभिःश्वास्पृष्टश्वविड्वराहादिपशुभिश्चस्पर्शनमल्पोपह
तिरुच्यते॥ तथाअल्पप्रदेशेअल्पकालेशूद्रोच्छिष्टश्रृगालादिस्पर्शनंवाल्पोपहतिरुच्यतेएवमाद्यंत्यजा
तिचांडालाद्यैःसूतिकयारजस्वलयापतितेश्वशवेनशस्पृश्याचसंस्पर्शेअत्यंतोपहतिर्भवति॥ अल्पका
लेअल्पप्रदेशेमद्यसंस्पर्शेतूच्छिष्टरुधिराद्यैःबहुकालेवस्तुदोषेवात्यन्तोपहतिर्भवति॥ सौवर्णराजत
लोहंविण्मूत्रादिचांडालादिस्पृष्टमात्रंनिर्लेपंजलप्रक्षालनाच्छुध्येत्सलेपंतस्मजलात्पांशुध्येत॥ अत्यंतोप
हतंवाङ्कितमंजलप्रक्षालनाच्छुध्येत॥ सौवर्णराजतताम्रचांडालोदक्याद्युच्छिष्टंसप्तरात्रमसिरान्नोदकेन
वशुध्येत॥ कांस्यादेरावर्तनंवह्न्युपघातेसर्वेषामावर्तनमेवतेजसानां॥ गोमूत्रपरिवासेनलेपानांविःपतामेध्या
वर्त्तनं॥ तांम्रस्यविण्मूत्रादिचांडालादिदूषितस्याम्लोदकात्पांशुशुद्धिः॥ कांस्यपित्तलयोविण्मूत्रादिर्गोदूषपा

स्म·आ·
४९

दक्षालनचंडालादिस्पर्शेतदेव त्रिसप्तकृत्वोभस्मनापरिमार्ज्यप्रक्षालनाच्छुद्धिः। अल्पकालोपहतौ तांपुन
परिलेखनात्संशुद्धिः। बहुकालोपहतो आवर्त्तनं भूमौ यद्वाश्मोनिखाते षण्मासेपरिमार्जनमेव तत्र दग्ध
प्रलेपस्यात्। एवं सर्वतैजसानां। आवर्त्तनंपुनः करणंपरिलेखनंतक्षणंकास्यपित्तलयोर्गोघ्रकाकोच्छिष्टशू
द्रस्पर्शेतुदकभस्मभिः प्रक्षालनं। अल्पकालोपहतेभस्मनासलवणेनैवावघर्षणाच्छुद्धिः। बहुकालेत्वावर्त्त
नंत्रपुसीसायसानां तस्मजलाभ्यां शुद्धिः सर्वत्रिनसानाल्पोपहतौ गोमूत्रगोमयभस्मास्तोदकैः शुद्धिः य
थाईकार्या शुक्तिशंखपाषाणमणिरत्नानामजानांविण्मूत्रचांडालाद्युच्छिष्टस्पर्शमात्रेजलप्रक्षालना
च्छुद्धिः सलेपानां तस्मजलाभ्यांशुद्धिः। अत्यंतोपहतानां सप्ताहंभूमौ निखायप्रक्षालनाच्छुद्धिः। सौवर्णर
जतानां शंखशुक्त्यश्मस्फाटिकादिरत्नेषु वेदेनदोषः॥ ॥ शृंगदंतास्थिमयानां अल्पोपहतौ बिल्वफल
चूर्णैगौरसर्षपैर्वा भस्मगोमूत्रगोमयानां अन्यतरेणप्रक्षालनात् शुद्धिः। अल्पोपहतौ तक्षणं अमेध्यरसवेधेत्या
गः। दारुवेणुवेत्रपात्राणां मल्पोपहतौ तक्षणं। अतिदुष्टानां त्यागः। कपित्थविल्वालाबुनालिकेरफलानां त

४९

क्तपात्राणांचाल्पोपहतौप्रक्षाल्यगोपुच्छनिघर्षणाच्छुद्धिःअत्यंतोपहतौत्यागः।शृंगास्थिदंतपात्राणांमज्ञानांच
दुर्लेखनामल्पोपहतानांनेत्रणप्रक्षालनाच्छुद्धिः॥ ॥मृन्मयानांपात्राणांरेषदुष्टानांपुनर्दहनाच्छुद्धिः।विण्मू
त्राद्युपहतानांशवसूतिकोदक्यादिस्पृष्टानांत्यागएव।महाजलरांडेष्वाल्पदोषेस्पर्शनंनदुष्यति।तत्रवाल्प
प्रक्षाल्यंस्रुक्स्रुवादिदारुपात्राणांजलप्रक्षालनाच्छुद्धिः।सस्नेहानांयज्ञियानामुष्णजलप्रक्षालनाच्छुद्धिः।सर्वपा
त्राणांसंहतानामेकस्योपहतौतस्यैवशुद्धिःकार्यानतत्स्पृष्टानांकंदमूलफलशाकानामपक्वानांवेणुवे
वस्त्रकाष्ठानांवाशुचिस्पृष्टानांजलप्रक्षालनात्तच्छुद्धिः॥ ॥वस्त्राणामेकपुरुषोपार्यलाराधिकानांछलाना
बहूनामन्येषांबहूनांचचांडालादिस्पृष्टानामहतक्रीतानांचप्रोक्षणाच्छुद्धिः।श्वेतकृष्णवस्त्रेषुपापेषुविंश
तोवकुत्वंतदल्पानांप्रक्षालनाच्छुद्धिः।अधौतानांमलिनानांचाल्पानांचबहूनांचवैदिकेकार्येनवानांवच्छि
रंगानांचप्रक्षालनाच्छुद्धिः॥ ॥आविककंबलस्याल्पदोषेसूर्यरश्मिभिःशुद्धिः।क्षौमवस्त्रस्याल्पदोषेप्रो
क्षणाच्छुद्धिः।विण्मूत्रादिदोषेवल्मीकमृत्तिकाप्रक्षालनाच्छुद्धिः॥ ॥कौशेयवस्त्रस्याल्पदोषेप्रोक्षणाच्छुद्धिः।

विण्मूत्राद्युपहतस्पष्टजलप्रक्षालनात्शुद्धिः। क्षौमवस्त्रस्याल्पदोषे प्रोक्षणात्शुद्धिः॥ विण्मूत्राद्युपहतौ बिल्वचूर्णाव
घर्षणात् जलप्रक्षालनाच्छुद्धिः। नीलीसंयुक्तं वस्त्रं स्वल्पेण वक्त्रवर्णेण: परित्याज्यं कंबलपट्टे नीलीदोषो नास्ति नेपालकं
बलेल्पो मध्ये। तेषां प्रोक्षणं। मूत्रादिदोषे। निष्ठसंतवैः फेनैर्विघृष्य जलप्रक्षालनाच्छुद्धिः। तूलशय्योपधानानां कुसुं
भादिरंजितवस्त्राणां चाल्पोपहतौ आतपे किंचित्शोषणं॥ विण्मूत्रादिसंस्पृष्टे संशोध्य संशोषणात्शुद्धिः। ऊर्णा
कार्प्पासतूलकंबलमकंडं सकर्दमादिनिर्यासानां चैवं। श्वेतवस्त्रे चांडालादिस्पृष्टे प्रक्षालनाच्छुद्ध्येत्। तस्य पु
रीषादिदोषे प्रक्षालनाच्छुद्धिः। शयनासनयानसंवेधानां संहतानां वक्रुरोमवस्त्राणां च प्रोक्षणात्शुद्धिः। बेलवब
र्म्मणां शुद्धिः। नवानां जंहडदादीति कुसुमकषायेण त्रिफलोदकेन वा गंधवत्वं शुद्धिः। चर्मभांडे बहिर्दो
षावेत्तरं न दुष्यति तत्र वा त्वं समभ्यक्य क्षाल्यं॥ ॥धान्यमेकपुरुषोद्धार्यं ताराधिकं चांडालादिस्पृष्टं प्रोक्षणा
त्शुध्येत्। एकपुरुषभारं प्रक्षालनाच्छुध्येत्॥ धान्यमशुद्धं स्वनिकायुक्तं तंडुलीकरणात् शुध्येत्। धान्यराशौ
मूत्रादिनिमेलिसांशमप – र्यावशिष्टमप्रक्षालणाच्छुध्येत्॥ ॥धान्ये ष्टहाच्छितेष्टहदाहे सति तत्र नरपशुभर

ोतद्धार्यं त्याज्यमेव। तृणमिश्रं सस्थं कण्टशूलस्थं च धान्यमशुद्धं प्रक्षालनेन शुद्ध्येत्। मुद्गमाषादिसिंबीधान्यानामल्पो
पहतौ प्रोक्षणेन शुद्धिः। धान्यमशुद्धं हलिसंस्पृष्टं निस्तुषीकरणेन शुद्ध्येत्। अत्युपहतौ त्याज्यमेव। दृढधान्ये
शुष्करूक्षलाराधिके वक्तुंलां शिथिलेषु द्रोणप्रमाणाद्दकुत्वां तंडुलविंदुलादीनां तत्र इविकुत्वं तत्र स्पर्श
दोषप्रोक्षणं। सर्वत्रापि एतच्चादिदोषतावन्मात्रं तत्पक्काशयप्रोक्तं। शिथिलतंडुलादि सर्वं प्रोक्षणमेव शुद्धपाश
नान्तरं तत्याज्यमेव॥ ॥स्पृष्टमात्रेण काष्ठादिकं नरसाराधिकं अल्पोपहतौ वा नातप्य शुद्ध्येत्। नरसारान्न
मार्ज्जप्रक्षालनाच्छुद्ध्येत्॥ शुष्कं चेदल्पमपि प्रोक्षणमेव। इत्याद्यैरत्युपहतं त्याज्यं॥ ॥अस्पृश्यकं चाण्डालादिस्पृ
ष्टं प्रोक्षेत्। भूतले केशकीटाद्यैर्मलिनमार्ज्जनादग्निना च शुद्ध्येत्। भूतलं शवखरोष्ट्रविड्वराहादिसे
वितं गोक्रमणमार्ज्जनप्रोक्षणैः शुद्ध्येत्। भूतलं विण्मूत्राद्यैरत्यन्तोपहतं चेदुल्लेखनगोनिवासमार्ज्जे
न प्रोक्षणैः शुद्ध्येत्। भूतलं नारीप्रसवदूषितं चाण्डालादिनिवासदूषितं चिरकालं विण्मूत्राद्यैरत्यन्तोपहतं चे
दुल्लेखनगोनिवासमार्ज्जनप्रोक्षणैः शुद्ध्येत्। भूतलं नारीप्रसवदूषितं चाण्डालादि निवासदूषितं

दिदूषितं स्वपरोच्छादिदूषितं तत्स्यान्मृत्तिकाकूटपानं पादविकामापूर्य गवाक्रमणमार्जनप्रोक्षणैः शुद्ध्येत्।
एतत्स्वस्थलमत्यन्तोपहतं वेत्खनित्वाग्निना दग्ध्वान्यमृत्तिकापूरणगवाक्रमणमार्जनप्रोक्षणैः शु
द्ध्येत्॥ गृहस्याशुचित्वे कुड्यानां लेपनं भूमेः परिलेखनं मार्जनं च कार्यं। स्थलस्य चिरकालं विण्मूत्रादि
वासितस्य श्मशानत्वं गतस्यापि दृष्टिप्रत्यालनात्पश्चात्पूर्वोक्तविधिना शुद्धिः। श्म - - - श्मशानत्वं
गते विण्मूत्राद्यैश्चिरकालमत्यन्तदूषिते दृष्टे हुईं हलकर्षणाच्छुद्धिः। गृहे विप्रक्षत्रविशां मरणे तत्रच्छिद्रम
यं लांडपक्वमन्नं च संत्यजेत्। मृतदेशं गोमयेनोपलिप्य अजाघ्राते गवाक्रान्ते ब्राह्मणपुण्याहवाचने वा
कुशसुवर्णमिश्रोदकैः प्रोक्षणाच्छुद्धिः। गृहे कश्चिद्राजादिनिगडबंधनान्मृतश्चेत्तद्भूमिं कुड्यं वसं प्रोक्ष
तृणाग्निनातापयित्वा सूर्यरश्मिप्रवायद्वाप्रोक्तविधिना शुद्धिः। गृहे जनने मरणे वा जाते अशौचांते
ईमे स्पर्शभूमिमृत्तिकाप्रक्षेपात्पुण्याहवाचनाच्छुद्धिः। विप्रगृहे शूद्रादिमरणे गृहस्य दशाहमाशौचं। अत्र
स्पृष्ट्वा मरणे मासेन शौचं। चांडालपतितादिचातुर्मासमाशौचं। रजस्वलादिमरणे द्विमासमाशौचं। सर्वत्र

शौचान्तेऽमेध्याक्तामिवस्त्रशुद्धिःकार्या॥ विशूद्रहेदग्धेतत्रछमार्जारदौष्टतेसस्पृष्टितकूहस्यकर्षणात्प्रोक्षणाच्छुद्धिः।
श्वकाकादौष्टतेचैवंकर्षणेविशेषः। प्रतिमालोहजाल्पोपहतिदूषितातस्मनाघर्षणपंचगव्येनशुध्येत।
प्रतिमापाषाणजावाल्पोपहतिदूषिताचेद्वल्मीकमृत्तिकयाजलैःप्रक्षालितापंचगव्येनशुध्येत। प्रतिमा
ताम्रसुवर्णादिधातुजाविण्मूत्रग्रामरसादिनादूषिताचेत्पंचगव्यैःपंचपंचाहमधिवास्यात्मान्यगोमू
त्रगोमयवल्मीकमृत्तिकाभिःसम्यक्प्रक्षाल्यपुनःप्रतिष्ठयाशुध्येत। रत्नजानांपंचगव्यैःप्रक्षाल्यपु
नःप्रक्षालनंकार्यं॥ ॥जलेसूक्ष्मिगंधवर्णरसान्वितंविण्मूत्रादिदूषितंत्रिगवांपानसमर्थंशुद्धं ततोल्पंश्व
काकाद्युपहतंएकगोःपानसमर्थंतथैवशुद्धंजलंशूद्रलांडोहततस्मिन्नेवादिनेशुद्धंतेनान्यदिनेश्वउष्ट्रा
नंनकार्यंदहतरलांडवातंचरुद्रोणाधिकंविण्मूत्रादिदूषितंजलंपरित्यज्यलांडंप्रक्षाल्यकुशसंघर्षण
त्वनःप्रक्षाल्यपंचगव्येनप्रोक्षणपूर्वजलपूरणेनशुध्येत॥ ॥वापीकूपतडागादिष्वल्पजलेषुश्वकर्ममार्जा
रादिशवाक्लिन्नेजीर्णेसतितज्जलंसर्वमुत्सृज्यमृत्तिकापरित्तन — हुतपंचगव्यप्रोक्षणाच्छुद्धिः। पाषाणेरिष्टकादि

103

स्मृ॰ आ॰
५२

वांविद्धेतत्तृणाच्छादनेदहनंअन्यत्समानदारुवन्द्धेप्रक्षालनमेववकूजलेषष्टिकुंभोद्धारःमूषकादिक्षुद्रप्राणि
पातेविंशत्कुंभोद्धारोगोमूत्रादिप्रक्षेपःस्वजलेजलप्राणिशवेनदोषः।वापीकूपजलेनरशवेस्थितेघटशतं
जलमुद्धृत्यपंचगव्यक्षेपणाच्छुद्धिः।पशुशवपातेपंचाशच्छुद्धिः।तत्रजलेनस्मरणेजलस्यत्रिरात्राशौचं।अ
शौचांतेपूर्वोक्तशुद्धिःकार्या।वापीकूपजलेउपानत्श्लेष्मविण्मूत्रपतनेनरकवसामज्जास्थिदूषितेषष्टि
कुंभजलोद्धाराच्छुद्धिः॥कूपादिजलेअशुद्धरजसादूषितेदिवासूर्यरश्मिवायुस्पर्शाच्छुद्धिः।रात्रौवा
युचंद्रनक्षत्ररश्मिस्पर्शाच्छुद्धिःसंध्यायांवायुस्पर्शाच्छुद्धिः।नदीस्रोततडागगजलेअंत्यजैर्दूषितेनत्स्वी
कृतजलस्थानादन्यत्रजलंशुद्धमेव॥ ॥शाणंपाणितलंमानंकुडवंप्रस्थमाढकं।द्रोणंवरखारिका
चेतिपूर्वंपूर्वंचतुर्गुणं।द्रोणप्रमाणनिर्मितेधान्यानगवाघ्रातेखरेणवमुनानाविच्चराहग्रामकु
क्कुटकाकैर्वास्पृष्टेस्पृष्टमात्रमुद्धृत्यशेषमन्नंपर्यग्निकृत्वासहस्रगायत्र्यालिमंत्रितेजलैःपवमानःसु
वर्जनःइत्यनेनानुवाकेनसहस्रलिमंत्रितेर्वाशुद्धवती।तिकाग्निर्वाशुद्धिर्गोमंत्रैर्वाजलैरभ्युक्षणंतस्यु

५२

द्रुमाश्रितिविप्रवचनं लघ्वा शुद्ध्येत्। अजामुखेवाघ्रातं शुद्ध्येत्। तदंते श्वकाकादिलालयावघर्षितेनान्नमा
त्रं समुद्धृत्य शेषं कनककवारिणा शुद्ध्यत्। उल्मुकेन स्पर्शयित्वा आज्यकानकेस्पृष्टं शुद्ध्येत्। अन्नं पूर्वोक्तं वि
ण्मूत्रनखरोमादिदुष्टं वेतरदुष्टमात्रं समुद्धृत्य पूर्वं वनं मंत्रोदकेना शुद्धं तस्मात्ति ब्राह्मते नालिखायं शु
द्रुमश्लितिविप्रवचना शुद्ध्येत्। घृतस्य नवनीतस्य वा आढकप्रमाणस्य श्वकाकपिपीलिकादिदुष्ट
स्यदुष्टांशमुद्धृत्य वस्त्रेण परिशोध्य तज्जातीयेन तद्भांडं पूरयित्वा सर्वमग्नौ प्रतप्य गायत्र्याभिमंत्रितजलाभ्यु
क्षणाच्छुद्धिः। तक्रतैलदधिक्षीरप्रभृतीनां द्रोणप्रमाणानां काकाद्युपहतौ घृतवच्छुद्धिः। तक्रदधिक्षी
राणि शूद्रभांडस्थानि द्विजभांडे प्रक्षिप्तानि शुद्धानि। नवनीतं घृतं तैलं शौंडदासादिभांडस्थं शूद्रीभांडे
स्थितं शुद्ध्येत्। नवनीतं घृतं शौंडचांडालादिभांडस्थं वेतरप्रतापविप्रभांडे क्षिप्तं वस्तु शुद्ध्येत्। नवनीतं घृ
तं चांडालेन प्रमादेन स्पृष्टं जले क्षिप्त्वोद्धृतं शुद्ध्येत्॥ ॥ द्रोणप्रमाणान्यूनप्रमाणान्यन्यनिर्मितान्नानामा
टकमात्रान्यूनघृतादीनां द्रोणप्रमाणान्यूनतक्रादीनां च पूर्वोक्तोपहतौ परित्यागो नापदि। आपादि

105

नुपूर्वोक्तविधिनाशुद्धिः॥ अतिशामेवज्ञःऊरुपाशानसमर्थसर्वस्मिंजनेस्मावनेशुद्धिः॥ अल्पानांवत्यागः
गुडलवणादीनांपर्यग्निकरणं॥ ॥भोजनेकेशकीटादिदर्शनेतावन्मात्रमुद्धृत्यजललस्मस्पृष्ट्वापिभिस्वाशुद्धे
त्।मुखेदष्टोनिष्ठीव्यपोन्नहृतंश्चाश्यपाश्नीयात्।पाकेकेशादिस्थितौत्पागः।तत्रभुक्त्वोपवसेत्।यद्वशुद्धधर्म्मो
पयोगिस्वदत्यंतप्रियंदेशकालतोत्यंतदुर्लभंतदुपहतंवेदल्पमपिपूर्वोक्तविधिनाशुद्ध्येत्।अश्वमुख
मजाश्चमुखंरतिकालेस्त्रीमुखंमृगग्रहेश्वनोमुखंश्चप्रवनेववत्समुखंफलपातनेपक्षिमुखंवत्सापनद
त्वंवसदाशुद्धमेवाबालातपनयनादर्वाक्शुद्धाः॥स्त्रीविवाहादर्वाक्शुद्धाः॥खकमशकपतंगमक्षिकया
न्यस्याघ्रात्यकीटगोहस्पस्पृश्यमृगामुकास्वजलस्थाः सर्वेजीवाःस्वलावशुद्धाः॥अशुद्धस्पर्शनेव
नदुष्यंति।वंद्वस्पर्शश्मयः स्वतःशुद्धाःस्थानिकोदकामेध्यपतितंत्यश्मशानसंश्रयंविनाग्राह्यता
वतःशुद्धिः।रजोवातोद्भवंशुद्धंहस्त्यश्वरथजातंवगवांपादरजश्च्यान्यसर्वत्रंरजश्चप्रशस्तं।श्वविद्
राहखरोष्ट्राजाविकाकोलूकयाम्यपक्षिवस्त्रमार्जनीसमुद्धृतंरजःस्पृष्टंवेदश्चीकरणमनायुःकरमशुभावह

सूर्येणचवायुस्पर्शनमनाप्युष्णमप्युष्ण
वाअज्ञातदोषंयद्दृष्टंतत्स्वतएवशुद्धं। संदिग्धदोषंयद्दृष्टंतदद्भिर्वाक्यैः शुद्धं। पवेत्यादिसर्वमशीकारंच। मुख
वावस्त्रकेशघटोदकेवनि-- पश्चुपतिश्चलिवासितंसुस्पर्शनमनाप्युष्णमप्युष्ण मथवात्यजेत्॥ निगिरेद्वासमावामेद्दुष्यानेन
जाविप्रुषोमेध्याःस्पृष्टावाविंदवः॥ स्मश्रुवास्यगतंमेध्यंदंतसक्तं अंत्यस्पृष्टकादिप्रदर्शनेगावःपृष्टतो
वेनवातांबूलेक्षुछितेतथकोनिशीर्णेचा। उत्तिष्ठताः। नावामेनत्यजेत्॥ मार्गकर्दमतोयानिस्पृष्टान्यंत्यश्ववा
मेध्याअमेध्याःनरजामलाः॥ पंथानश्चविशुध्यंतिसोमसूर्यांशुमारुतैः॥ शुद्धमेववहज्जलंवा कुशग्रस्तमंत्रानिर्निक्त
यसैः। मारुतेनैवशुध्यंतिपक्वेष्टकाचितानिच। शुद्धाश्वसंततधाराः॥ इत्यादिशुद्धिप्रमाणम्॥ ॥अथशरीरशुद्धिः॥ ॥अमेध्यानिकस्यस्पृष्टो
मतातंवसदाशुचिः॥ ॥इत्यादिस्मृत्यर्थसारेद्रव्यशुद्धिप्रमाणम्॥ ॥इतिकोदक्यावशनाविषयेवर्ज्यंवा
येगंधलेपापनोदनात्शुद्धिः। चांडालपतितंवहस्ततःपरिवर्जयेत्। इतिकोदक्यापतिताप्रक्रमाच्चब्राह्मणकस्तुगांतरेसंधानेसचेलेस्नानं। संकद
अस्पृश्यकटकैस्थानेचांडालस्पृतिकोदक्यापतितानां क्रमाच्च ब्राह्मणेकस्तुगांतरेसंधानेसचेलंस्नानंकार्यं। श्वपाकादिछायारोहणेवतथैवचांडालादिस्पृ
ष्टानेगोवालव्यजनादर्वाकारतस्पेनसचैलंस्नानंकार्यं।

स्मृ.आ.
५४

तिक्तोदक्यादिपतितानामत्यास्पर्शनेसचैलंस्नात्वाअब्लिंगमंत्रंगायत्रींवाअष्टशतंपादोनमर्द्धपादंवाक्रमाज्ज
पेत्।अत्रवडांतरितसंस्पर्शःसाक्षात्स्पर्शएव।चांडालादिस्पृष्टस्पृष्टस्पृष्टस्यद्वितीयस्यचांडालादिस्पृष्टस्पृष्टस्पृष्टस्य
तृतीयस्यसचैलंस्नानंतत्रदर्द्धजपः।सर्वत्रमत्यास्पर्शनेचतुर्थस्यस्नानमात्रं॥ ॥चंडालसूतिकोदक्यापतिताम
त्यास्पर्शनेसचैलंस्नात्वाचतुःपंचाशज्जपंतत्पादोनमर्द्धपादंचक्रमात्कुर्यात्।अमत्याचांडालादिस्पृष्टःस्पृ
ष्टस्यसचैलंस्नानंतत्रदर्द्धजपःकार्यःचतुर्थस्याचमनं॥ ॥रजस्वलाविषयेद्वितीयादिदिनेषुस्नानपूर्वपाद
पादोनजपःप्राकृतःतत्स्पृष्टस्पृष्टस्पृष्टादिषुस्नात्वातत्रदर्द्धजपःकार्यः।अचेतनेनदंडादिनाचांडालादिस्पर्शने
स्नानमात्रं।तृतीयस्याचमनेइत्यागौडोदाहरणं॥ ॥मत्यारजकादिस्पर्शनेसचैलंस्नात्वागायत्रीजपंकुर्यात्॥
मत्यातत्स्पृष्टस्पर्शनेसचैलंस्नानं।अमत्यारजकादिस्पर्शनेसचैलंस्नानमेव।तत्स्पृष्टस्पर्शनेस्नानमात्रं।तृ
तीयस्यज्योतिर्दर्शनं।मत्यापवमङ्जातिस्पर्शनेसचैलंस्नानंपंचजपः।तत्स्पृष्टस्यस्नानं।हीनशूद्रस्पर्शनेस
चैलस्नानं।सत्शूद्रस्पर्शनेस्नानं।निषादस्पर्शनेत्वाचमनंकार्यं॥ ॥शवशावशौविप्रेतच्छमदेवद्रव्योप

५४

जीविग्रामयाजकसोमविक्रयिषु– चितिकाष्टस्मशानार्त्त्विमघलांडासस्नेहमाक्षपाक्षीनिस्टस्चासचेलं
स्नात्वा गायत्र्याष्टशतंजस्वा घृतंप्राश्य पुनः स्नात्वा त्रिरावामेत्‌ अस्नेहेस्नानं अमत्यास्नानमेवा सर्वत्र ब्र
ह्मंजपहोमस्छाने अन्नदानोदकतुलादिदानंकार्यं॥ ॥वेदवाह्यशैवशाक्तेयपाशुपतलोकायतिकना
स्तिकदेवलकंविकर्मस्थद्विजान्‌ आरूढपतितविष्टशाग्निमानिशस्त्रशवशवदाहकंश्वंस्पृष्ट्वा सचेलंस्ना
यात्‌ अमत्यास्नानमात्रं कुर्यात्‌॥ ॥अजीर्णेभ्युदिते अस्तमिते विरिक्तेदुःस्वप्नेदुर्जनस्पर्शनेक्षुरकर्मणि
धूम्रस्पृष्ट्वादूर्ध्वाधुपरिछर्द्दितेचस्नानं॥ ॥ऋतौमैथुनेस्नानं॥ अनृतौ वशौचावमनं दिवामैथुने अष्टम्यां चतुर्दश्यां
पर्वणि मैथुनेसचैलंस्नानं स्मृतंप्रायश्चित्तं च कार्यं॥ ॥छत्र पुरीषादौशौचमकृत्वा यामद्वयादूर्ध्वं कालस्थितौ स
चैलंस्नात्वाष्टाहुतिहोमो जपो वा कार्यः॥ उदयास्तमययोः स्कंदित्वा सचेलंस्नात्वा पुनर्मानं इति जस्वा सप्त व्याहृ
तिभिराज्याहुतीर्जुहुयात्‌ जपेद्वा अमत्या सचैलंस्नानमेव॥ ॥अस्थिस्पर्शने करीक्रोशे सचेलंस्नानं जपहोमौ
कार्यौ। अजंबुकश्वकादिक्रियाद् खरोष्ट्रविड्वराहमेषवानरस्पर्शने नालेऽवईकरोमुच्छासचेलंस्नानं नाले

रथस्पर्शने स्नानमात्रं। शौचेन्नालेऽर्द्धस्पर्शनेऽपि स्नानमात्रं नालेऽधःस्पर्शने तु प्रक्षाल्य पुनराचम्य शुध्येत्। काको
लूकतासधूककपोतग्रामकुक्कुटादिक्रव्यादपक्षिस्पर्शने नालेऽर्द्धेकरोक्तं सचेलस्नानं नालेऽधःस्पर्शने स्ना
नमात्रं। शौचेन्नालेऽर्द्धस्नानं नालेऽधःप्रक्षालनं। रथ्याकर्दमतोयस्पृष्टो वा ध्वेर्नालेऽर्द्धस्पृष्टः स्नानः स्नायात्। ना
लेऽधःप्रक्षालनं॥ ॥अमेध्येऽध्वसजातीयपरकीयविण्मूत्ररेतोरक्तार्त्तवास्थिमज्जावसाद्यैर्मलैः शुक्रामध्यैःश्व
नालेऽधःप्रवाहश्चवसंस्पृष्ट्वा स्पृष्टजलैः गंधलेपं प्रक्षाल्य स्नानं नालेऽर्द्धस्पर्शने स्नात्वोपवासः। इंद्रियेषु छिद्रस्प
र्शने स्नात्वोपोष्य पंचगव्यं पिबेत्। स्वकीयमलस्पर्शने तु नालेऽर्द्धमापि प्रक्षालनमेव॥ ॥सस्नेहद्विजास्थिस्पर्श
ने विप्रस्य सचैलस्नानं विरंतने त्वा च मगां स्पृष्ट्वा सूर्यं वाऽदृश्य शुध्येत्। अद्विजास्थिसस्नेहे विरात्रं निस्नेहे त्वेक
रात्रं। अमानुषास्थि तु लत्तवर्न्यं पंचनखशववदंतास्थिसस्नेहे स्नानं वस्त्रांतरधारणं कुशोदकं वा॥ ॥दृष्टौ सक
र्द्दमग्रामसंकरप्रवेशं जंघयोस्त्रिसप्तात्रिकाः पादयोः षड्डिस्वा प्रक्षाल्यनं वा शुध्येत्कर्दमादौ न दोषः। श्व
पाकादिच्छायारोहणे सचेलं स्नात्वा घृतं वा हिरण्योदकं वा कुशोदकं वा पिबेत्। श्वपाकादिस्पर्शने सचैलं

स्नात्वाष्टसहस्रजपः। मत्यावेदुपवासश्च स्पृष्टादिव्रतारंभेनयोग्यं कल्पं॥ ।दिवारजस्रावे जनने मरणे वा त
द्दिनादिकमशुचित्वं स्यात्। रात्रौ रजस्रावादौ सति अर्धरात्रादर्वाक्चेत्पूर्वदिनमित्येकः पक्षः। रात्रिं त्रिधा
विभज्य पूर्वभागद्वये चेत्पूर्वदिनमित्यन्यः पक्षः। उदयात्पूर्वं चेत्पूर्वदिनमित्यपरः। एतेषां पक्षाणां देशाचार
तो व्यवस्था॥ ॥अज्ञाते रजस्रावे चतुर्दिनेषु ज्ञाते तद्रजस्रावादिकमशुचित्वं स्यात्। जननादौ तु स्नानादिक
मशुचित्वं स्मृतं। सर्वथा अज्ञाते चेत्तदशुचित्वमेव। अतो स्नानात्पूर्वं च रजस्वलास्पृष्टं दुष्टमेव। एवं सर्वपा
पनिमित्तं यस्नानादिपापपादकं। सूतकं तु स्नानादिकमेव। रजस्वला त्रिरात्रमशुचिः स्यात्। चतुर्थेह
नि स्नात्वा शुद्धा भवति। तद्दिने स्पर्शपादेवे पित्र्ये च कार्ये रजोनिवृत्तौ शुचिः। सूतिकास्त्वाशौचान्ते मलं प्रक्षा
ल्य दन्तान्धावयित्वा सचेलं स्नायात्। रजस्वला चतुर्थेहनि षष्टिमृत्तिकाभिः शौचं कृत्वा दन्तादिक्षा
चपादपारस्पूर्न मृत्तिकाभिर्विधवादिद्विगुणमृत्तिकाभिः। शौचं कृत्वा मलं प्रक्षाल्य दन्तधावनपूर्वं संगवे
सचेलं स्नायात्। रजःस्वलायाः स्नातायाः पुनरपि रजोदृष्टौ अष्टादशदिनादर्वाक् शुचित्वं नास्ति। अष्टादशे

आचा॰
५६

दिने रजो दृष्ट्वा चेकरात्रमशुचित्वं नवदशदिने द्विरात्रं विंशद्दिने त्रिरात्रमेव। प्रायशो विंशतिदिनादूर्ध्वं रज
स्राविणीनामेवं भवति। विंशतिदिनादर्वाक्प्रायशो रजोदर्शनवतीनामष्टादशदिने पि त्रिरात्रमशुचित्वं
॥ ॥किंच त्रयोदशदिनादूर्ध्वं प्रायशो रजस्राविणीनामेकादशदिनादर्वागशुचित्वं नास्ति। एकादश
दिने रजोदृष्ट्वा चेकरात्रमशुचित्वं द्वादशे द्विरात्रं त्रयोदशादिषु त्रिरात्रमेव॥ ॥सचेलं स्नानमेव॥ ॥
वस्त्रं प्रक्षाल्य स्नात्वा पुनः सचेलं स्नानं। एकवस्त्रस्पृष्टश्चेत्तथा स्नानोपि सचेलं स्नानमेव॥ ॥संग्रामे दृ
ष्टमार्गे च यात्रादेवगृहेषु च। उत्सवक्रतुतीर्थेषु विप्लवे ग्रामदेशयोः। महाजलसमीपे च महाजनस्वे
षु च। अस्पृश्या ते महापत्सु स्पृष्टास्पृष्टिर्न दुष्यति। प्राप्यकारीन्द्रियं स्पृष्टमस्पृष्टमितरेन्द्रियं। तयोश्च
विपर्यये प्राहुः स्पृष्टास्पृष्टाभिधानतः॥ ॥इत्यादि स्मृत्यर्थसारे स्पृष्टास्पृष्टिशुद्धिः॥ ॥अथाशौचविधिः
चतुर्मासात्पत्तरे गर्भमात्रनाशः स्राव उच्यते॥ तत्र स्रावे आद्ये मासत्रये मातुस्त्रिरात्रमाशौचं। उपरि मातुर्ग
र्भमाससंख्यासमदिनमाशौचं। सगोत्रसपिंडानां स्नाने न सद्यः शुचिः। यतः प्रसूतिसंतानाः विश्लेषास

५६

कूटस्थात्तमारभ्य गणिताः सप्त पुरुषाः सपिंडाः ऊर्ध्वं समानोदकाः॥ ॥पंचषष्ठमासयोर्गर्भमात्रनाशः पातस्तत्र
ते।पाते मातुर्गर्भमाससंख्यासमदिनमाशौचं। सपिंडानां त्रिरात्रं।इदं गर्भनाशप्रयुक्ताशौचं सर्ववर्णसमं॥ ॥स
प्तममासप्रभृति पूर्णगर्भनिर्गमं प्रसवशब्देनोच्यते। प्रसवे जनननिमित्तमाशौचं पूर्णं दशाहादिकं सर्वेषां यथाव
र्णं भवति। सोदकानां त्रिरात्रं जनननिमित्तास्पृश्यत्वं मातुरेव यावदाशौचं। न पितुः। तस्य स्नानानंतरमस्पृश्य
त्वं नास्ति। सपिंडानां अस्पृश्यत्वं सर्वदा नास्त्येव। सूतिकायाश्च वर्णाशौचे गते संव्यवहारयोग्यैव अदृष्टार्थे तु क
र्मसु मातुः पुत्रप्रसूतौ विंशतिरात्रेण योग्या। स्त्रीप्रसूतौ मासेन योग्या। पुत्रजननदिवसे हिरण्यप्रदानं वा स्वजा
वासः शय्यागृहादिकं सर्वं प्रतिग्राह्यं कृतान्नवर्ज्यं। कृतान्नग्रहणे चांद्रायणं कार्यं पुत्रजन्मदिवसे दानं कु
र्यात। हिरण्यपात्राभावे तदानीं संकल्पं पश्चात्समर्पयेत्। प्रथमे दिवसे हिरण्यपात्रादिदानं। षष्ठे सप्तमे वाव
लिदानं। दशमे दिने अन्नदानं। इत्यादि यथाचारं कार्यं। सूतिकागृहे रक्षा च कार्या रात्रौ विशेषेण॥ ॥ज
न्माशौचमध्ये तच्छिशुमरणे दृश्यते। नालच्छेदादूर्ध्वं शिशुमरणे निःप्राणशिशुनिर्गमने वा जनननिमि

ना३

त्ताशौचं कर्त्तव्यं यथा वर्णानां सर्वेषां सपिंडानां मस्थेव मरणनिमित्ते सद्यःशुद्धिः नालच्छेदनात्पूर्वं शिशुमरणे
तु जनननिमित्ताशौचं सपिंडानां त्रिरात्रं मरणनिमित्ते सद्यःशुद्धिः मातुर्जनननिमित्ताशौचं कर्त्तव्यं य
थावर्णं मस्ति मरणनिमित्ते सद्यःशुद्धिः ॥ ॥ नामकरणात्पूर्वं शिशुमरणे निखननमेवानुगमनं नाग्न्युदक
दानादिकं ज्ञातीनां सचैलस्नानं शुद्धिः ॥ ॥ ततो दन्तजननात्पूर्वं मरणे निखननं तूष्णीं दहनोदकादिदा
नं वा कार्यं। अनुगमनं कृताकृतं खननपक्षे सद्यःशुद्धिः दहने त्वेकाहः खनने वस्त्राद्यमलं प्रक्षाल्य घृतेना
भ्यज्य संस्नाप्य नववस्त्रसूत्रगंधमाल्यानुलेपनाद्यैः शक्त्यालंकृत्य ग्रामाद्बहिः शुचौ देशे कार्यं दहने च शवं
तथा संस्नाप्यालंकृत्य बांधवा ज्येष्ठपूर्वाः श्मशानं नीत्वा लौकिकाग्निना तूष्णीं कुर्युः तूष्णीं उदकादि
दानं वा दहने अमेध्य चंडाल सूतिका पतिता वितारीं वर्जयेत् ॥ ॥ दंतजननात्पूर्वं त्रिवर्षपर्यंतमकृतचौ
डस्य मरणे खननं दहनं वा कार्यं खनने एकाहमाशौचं दहने त्रिरात्रं अत्र ऊनद्विवर्षांतमनुगमनं कृ
ताकृतपक्षाचित्यं ॥ ॥ दंतजननात्पूर्वं त्रिवर्षपर्यंतं कृतचौलस्य मरणे तूष्णीं दहनं तूष्णीं उदकादिदानं

त्रिरात्रमाशौचं नियतमेव कार्यं। त्रिवर्षात्परं कृतचौडस्याकृतचौडस्यापि मरणे यावदुपनयनं तावदन्नेन तूष्णीं दहनो
दकादिदानं त्रिरात्राशौचादीनि नियतानि कार्याणि। अनुपनीतमरणे मातापित्रोर्दशाहाशौचमपत्नी नाहृता। अनुपनीत
स्त्रीशूद्रवर्णानां स्वाशौचकालत्रिभागाहं इदं स्पष्टं। अनुपनीतमरणे अतीताशौचं नास्ति स्नानमेव। इदं वपः
प्रयुक्ताशौचं सर्ववर्णसमं। अशौचान्ते स्नात्वाग्निं वा वनस्थं ब्राह्मणान्भोजयित्वा स्वग्निं वा वनं। कार्ये स्त्रीमर
णे तु त्रिपुरुषविषयस्तानीनामा चौडकरणाद्वा चौडकालाद्वा मासेन शुद्धिः। स्त्रीणां सापिंड्यं त्रिपुरुषमेव अप्रत्ता
सु तत्तोवाग्दानादर्वागेकाहमाशौचं। ततो विवाहादर्वाक्पतिपक्षे पितृपक्षे च त्रिपुरुषपर्यंतं त्रिरात्रं जाय
नालाविपि विवाहानि श्रुयावधिरित्येके। अत्र क्रमेण द्विवर्षे खननं पश्चाद्दहनं त्रुरुषवद्वा अस्पष्टत्वादिसमं च
र्थवदेव उपनयनाहूर्द्ध पुरुषमरणे विवाहादूर्द्ध स्त्रीमरणे शूद्रमरणे च विधिवद्दग्धानाहिताग्नेर्मरणादिव
समासस्याशौचं कार्यं। अनाहिताग्नेर्विधिवद्दहनात्तावेतदानीमाशौचग्रहणं कृतान्तं। आहिताग्नेर्विधिवदद
नालावेआशौचग्रहणं नास्ति चौलकपिंडदानसहितं यथावर्णाशौचं कार्यं। तत्र दहनं ब्रह्मचार्यादेरनग्निकस्य

पूर्णा

स्मृ॰ आ॰

विधुरादेश्चकपालाग्निना श्मशानस्थोक्तविधिना कार्यं गृहस्थस्यानाहिताग्नेर्गृह्याग्निना कार्यं। आहिताग्नेश्चेताग्नि
भिर्दहनं कार्यं। तत्राशौचं ब्राह्मणानां दशाहं क्षत्रियाणां द्वादशाहं वैश्यानां पंचदशाहं शूद्राणां मासं सच्छूद्राणां
द्विजशुश्रूषापंचमहायज्ञवतां शूद्राणां तु पंचदशाहं। चतुर्थे दशरात्रं स्यादित्यादिपक्षा दूषिताः॥ एकाहाच्छु
ध्यते विप्रस्त्याद्याश्चनादृताः। तत्राशौचमाहिताग्नेर्विधिवद्दहनं कृत्वा दहनदिवसमारभ्यैव कार्यं। विदेशस्थे
मृते यावद्विधिना न संस्कारस्तावत्तत्पुत्रादीनां संध्यादिकर्मलोपो नास्त्येव वपनं च पुत्राणां प्रथमेह्नि कार्यं
दशमे वा। आद्याद्वाधिकास्मिश्चिदिने वा ग्रामाद्बहिः कार्यं न खनि कृतं नंच गुरुमरणे चैवं॥ ॥ मृतशरीराला
भे अस्थ्नां संस्कारं कुर्यात्। अस्थ्नामलाभे पालाशवृंतैः कुशैर्वा शरीरप्रकृतिं कृत्वा पुनः संस्कारं कुर्यात्॥
आहिताग्निपुनःसंस्कारे तु त्रिरात्रं शवदाहादिकं संपूर्णाशौचं यथावर्णं कार्यं। अनाहिताग्नेः पुनःसंस्कारे तु
मृतकामध्ये कृतस्य मृतकशेषेणैव शुद्धिः। अतीते मृतके पुनःसंस्कारे तु पूर्वमगृहीतानां शौचस्य पुत्रस्य
पत्न्याश्च दशाहादिकं संपूर्णाशौचं गृहीताशौचस्य पुत्रस्य पत्न्याश्च त्रिरात्रं। पत्नीपुनःसंस्कारे पत्युश्चैवं।

सपत्न्यो मिथश्चैवं ॥ अगृहीताशौचानां सपिंडानां त्रिरात्रं गृहीताशौचानां सपिंडानां पुनराशौचं नास्ति ॥ ॥वि
देशस्थजनने मरणे वा प्रथमादिवसादूर्ध्वं ज्ञाते पुत्रादीनां स्वाशौचशेषेणैव शुद्धिः ॥ ॥हीनवर्णस्य ब्राह्मणादु
त्कृष्टजाति सपिंडत्वे उत्कृष्टजात्याशौचमेव ॥ दासीदासस्य प्रेष्यस्य स्वस्वामिकार्ये स्वाम्याशौचसमकाले गतेस्व
